CC0. In Public Domain, Digitizagtion by eGangotri

क ३/६

संस्कृत गद्य पद्य संग्रह

आम्नाय--ग्रन्थालय,
भरतनिधि, करौंदी
वाराणसी-5

ा-ग्रन्थालय
रौंदी, वाराणसी-५
क ३/६

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ગુજરાત માધ્યમિક શાળાન્ત પ્રમાણપત્ર પરીક્ષા-મંડળ

संस्कृत गद्य-पद्य संग्रह

(માધ્યમિક શાળાન્ત પ્રમાણપત્ર પરીક્ષા માટે)

[१९६३-६५]

के 3/6
आम्नाय-ग्रन्थालय,
भरतनिधि, करौंदा
वाराणसी-5

ગુજરાત એસ. એસ. સી. એક્ઝામિનેશન બૉર્ડ
વતી પ્રકાશક
અનડા બુક ડીપો
પુસ્તક-પ્રકાશક અને વિક્રેતા
ગાંધીમાર્ગ : : : અહમદાબાદ

મૂલ્ય ૫૦ ન. પૈ.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अनुक्रमः

गद्य-विभागः

१.	काकादिकूटेन हृतश्चित्रकर्णः।	१
२.	टिट्टिभेन व्याकुलीकृतः समुद्रः।	३
३.	शृगालस्य मेदपाटवम्।	४
४.	वाचाटः कच्छपः।	६
५.	राजप्राप्तौ भेकानामसन्तोषस्तत्फलं च।	७
६.	वृकशिशोः शाठ्यम्।	८
७.	आर्यकापहरणम्।	९
८.	भीमसेनस्य कोपः।	१३
९.	शकुन्तलादुष्यन्तयोः प्रथमः समागमः।	१७
१०.	सोमेश्वरतीर्थयात्रा।	२०
११.	द द द।	२२
१२.	एका श्लोकव्याख्या।	२३

पद्य-विभागः

१३.	रामादिपरिणयः।	२५
१४.	दमयन्तीस्वयंवरः।	२८
१५.	प्रावृट्शरद्वर्णनम्।	३२
१६.	रतिविलापः।	३५
१७.	महाभिनिष्क्रमणम्।	३७
१८.	दशावतारलीला।	३९
१९.	श्रीरत्नाकरपञ्चविंशिका।	४१
२०.	सूक्त्यन्योक्तिविलासः।	४३

प्रकाशकः- छोटुभाई र. अनडा, अनडा बुक डीपो, गांधीमार्ग, अमदावाद
मुद्रकः- मणिभाई पु. मिस्त्री, आदित्य मुद्रणालय, रायखड, अमदावाद

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गद्यविभागः।

१. काकादिकूटेन हतश्चित्रकर्णः।

अस्ति कस्मिंश्चिद्वनोद्देशे मदोत्कटो नाम सिंहः। तस्य सेवकाश्चयः काको, व्याघ्रो जम्बूकश्च। अथ तैर्भ्रमद्भिः कश्चिदुष्ट्रो दृष्टः पृष्टश्च—'कुतो भवानागतः सार्थाद् भ्रष्टः?' स चात्मवृत्तान्तमकथयत्। ततस्तैर्नीत्वा सिंहेऽसौ समर्पितः। तेनाऽभयवाचं दत्त्वा, 'चित्रकर्ण' इति नाम कृत्वा च स्थापितः। अथ कदाचित्सिंहस्य शरीरवैकल्याद् भूरिवृष्टिकारणाच्चाहारमलभमानास्ते व्यग्रा बभूवुः। ततस्तैरालोचितम्—'चित्रकर्णमेव यथा स्वामी व्यापादयति, तथाऽनुष्ठीयताम्। किमनेन कण्टकभुजा?' व्याघ्र उवाच—'स्वामिनाऽभयवाचं दत्त्वाऽनुगृहीतस्तत्कथमेवं संभवति?' काको ब्रूते—'अस्मिन्समये परिक्षीणः स्वामी पापमपि करिष्यति। यतः—

त्यजेत्क्षुधार्तो महिलां सपुत्रां,
खादेत्क्षुधार्ता भुजगी स्वमण्डम्।
बुभुक्षितः किं न करोति पापं,
क्षीणा नरा निष्करुणा भवन्ति॥ १॥

अन्यच्च—

मत्तः प्रमत्तश्चोन्मत्तः, श्रान्तः क्रुद्धो बुभुक्षितः।
लुब्धो भीरुस्त्वरायुक्तः कामुकश्च न धर्मवित्'॥ २॥

इति संचिन्त्य सर्वे सिंहान्तिकं जग्मुः। सिंहेनोक्तम्—'आहारार्थं किंचित्प्राप्तम्?' तैरुक्तम्—'यत्नादपि न प्राप्तं किञ्चित्।' सिंहेनोक्तम्—'कोऽधुना जीवनोपायः?' काको

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वदति—'देव, स्वाधीनाहारपरित्यागात्सर्वनाशोऽयमुपस्थितः।' सिंहेनोक्तम्—'अत्राहारः कः स्वाधीनः?' काकः कर्णे कथयति—'चित्रकर्णः'। सिंहो भूमिं स्पृष्ट्वा कर्णौ स्पृशति। 'अभयवाचं दत्वा धृतोऽयमस्माभिः। तत्कथमेवं संभवति? तथा च—

न भूप्रदानं न सुवर्णदानं, न गोप्रदानं न तथान्नदानम्।
यथा वदन्तीह महाप्रदानं, सर्वेषु दानेष्वभयप्रदानम्॥ ३॥

अन्यच्च—

सर्वकामसमृद्धस्य, ह्यश्वमेधस्य यत्फलम्।
तत्फलं लभते सम्यग्रक्षिते शरणागते'॥ ४॥

काको ब्रूते—'नासौ स्वामिना व्यापादयितव्यः। किन्त्वस्माभिरेव तथा कर्तव्यं, यथाऽसौ स्वदेहदानमङ्गीकरोति।' सिंहस्तच्छ्रुत्वा तूष्णीं स्थितः। ततोऽसौ लब्धावकाशः कूटं कृत्वा, सर्वानादाय सिंहान्तिकं गतः। अवदच्च—'देव, यत्नादप्याहारो न प्राप्तः। अनेकोपवासखिन्नः स्वामी। तदिदानीं मदीयमांसमुपभुज्यताम्। यतः—

स्वामिमूला भवन्त्येव सर्वाः प्रकृतयः खलु।
समूलेष्वेव वृक्षेषु प्रयत्नः सफलो नृणाम्'॥ ५॥

सिंहेनोक्तम्—'वरं प्राणपरित्यागो, न पुनरीदृशि कर्मणि प्रवृत्तिः।' जम्बुकेनापि स्वदेहार्पणस्य वार्ता कृता। सिंहेनोक्तम्—'मैवम्'। अथ व्याघ्रेणोक्तम्—'मद्देहेन जीवतु स्वामी।' सिंहेनोक्तम्—'न कदाचिदेवमुचितम्।' अथ चित्रकर्णोऽपि जीवितविश्वासस्तथैवात्मदानमाह। ततस्तद्वचनात्तेन व्याघ्रेणासौ कुक्षिं विदार्य व्यापादितः, सर्वैर्भक्षितश्च। अत उक्तम्—

मतिर्दोलायते सत्यं सतामपि खलोक्तिभिः।
ताभिर्विश्वासितः साधुर्म्रियते चित्रकर्णवत्॥ ६॥

—हितोपदेशे सन्धौ नवमी कथा।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

२. टिट्टिभेन व्याकुलीकृतः समुद्रः ।

दक्षिणसमुद्रतीरे टिट्टिभदम्पती निवसतः । तत्र चासन्न-प्रसवा टिट्टिभी भर्तारमाह—'नाथ, प्रसवयोग्यस्थानं निभृत-मनुसंधीयताम् ।' टिट्टिभोऽवदत्—'भार्ये, नन्विदमेव स्थानं प्रसूतियोग्यम् ।' सा ब्रूते—'समुद्रवेलया व्याप्यते स्थानमेतत् ।' टिट्टिभोऽवदत्—'किमहं निर्बलः समुद्रेण निग्रहीतव्यः ?' टिट्टिभी विहस्याह—'स्वामिन्, त्वयि समुद्रे च महदन्तरम् । अथवा—

पराभवं परिच्छेत्तुं योग्यायोग्यं च वेत्ति यः ।
अस्तीह यस्य विज्ञानं कृच्छ्रेणापि न सीदति ॥ १ ॥

अपि च—

अनुचितकार्यारम्भः, स्वजनविरोधो, बलीयसा स्पर्धा ।
प्रमदाजनविश्वासो, मृत्योर्द्वाराणि चत्वारि' ॥ २ ॥

ततः कृच्छ्रेण स्वामिवचनात्सा तत्रैव प्रसूता । एतत्सर्वं श्रुत्वा, समुद्रेणापि तच्छक्तिज्ञानार्थं तदण्डान्यपहृतानि । ततष्टिट्टिभी शोकार्ता भर्तारमाह—'नाथ, कष्टमापतितम् । तान्यण्डानि मे नष्टानि ।' टिट्टिभोऽवदत्—'प्रिये, मा भैषीः ।' इत्युक्त्वा, पक्षिणां मेलकं कृत्वा, पक्षिस्वामिनो गरुडस्य समीपं गतः । तत्र गत्वा सकलो वृत्तान्तष्टिट्टिभेन भगवतो गरुडस्याग्रे निवेदितः । 'देव, समुद्रेणाहं स्वगृहावस्थितो विनापराधेनैव निगृहीतः ।' ततस्तद्वचनमाकर्ण्य गरुत्मता प्रभुर्भगवान्नारायणः सृष्टिस्थितिप्रलयहेतुर्विज्ञप्तः । स समुद्र-मण्डदानायादिदेश । ततो भगवदाज्ञां मौलौ निधाय समुद्रेण तान्यण्डानि टिट्टिभाय प्रत्यर्पितानि ।

अत उक्तम्—

अङ्गाङ्गिभावमज्ञात्वा कथं सामर्थ्यनिर्णयः ।
पश्य टिट्टिभमात्रेण समुद्रो व्याकुलीकृतः ॥ ३ ॥

— हितोपदेशे सुहृद्भेदे सप्तमी कथा ।

१. ६ऽ धातु. २. गिरस्ताट पाठ. ३. रत्न धातु.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

३. शृगालस्य भेदपाटवम् ।

आसीत्कस्मिंश्चिद्वनोद्देशे महाचतुरको नाम शृगालः । तेन कदाचिदरण्ये स्वयं मृतो गजः समास्वादितः । स तस्य समन्ताद् भ्रमति परं कठिनां त्वचं भेत्तुं न शक्नोति । अथावसर इतश्चेतश्च विचरन्कश्चित्सिंहस्तमेव प्रदेशं समाययौ । अथ सिंहं समागतं दृष्ट्वा, स क्षितितलविन्यस्तमौलिमण्डलः संयोजितकरयुगलः सविनयमुवाच—'स्वामिन्, त्वदीयोऽहं लागुडिकस्त्वदर्थं गजमिमं रक्षामि। तदेनं भक्षयतु स्वामी।' तं प्रणतं दृष्ट्वा सिंहः प्राह—'भोः, नाहमन्येन हतं सत्त्वं कदाचिदपि भक्षयामि। उक्तं च—

वनेऽपि सिंहा मृगमांसभक्ष्या बुभुक्षिता नैव तृणं चरन्ति ।
एवं कुलीना व्यसनाभिभूता न नीतिमार्गं परिलङ्घयन्ति ॥१॥

तत्तवैव गजोऽयं मया प्रसादीकृतः, तच्छ्रुत्वा शृगालः सानन्दमाह—'युक्तमिदं स्वामिनो निजभृत्येषु। उक्तं च यतः—

अन्त्यावस्थोऽपि महान्स्वामिगुणान्नोज्झति शुद्धतया ।
न श्वेतभावमुज्झति शङ्खः शिखिभुक्तिमुक्तोऽपि' ॥२॥

अथ सिंहे गते कश्चिद् व्याघ्रः समाययौ । तमपि दृष्ट्वाऽसौ व्यचिन्तयद्—'अहो एकस्तावद् दुरात्मा प्रणिपातेनापवाहितः । तत्कथमिदानीमेनमपवाहयिष्यामि ? नूनं शूरोऽयं, न खलु भेदं विना साध्यो भविष्यति। उक्तञ्च—

न यत्र शक्यते कर्तुं साम दानमथापि वा ।
भेदस्तत्र प्रयोक्तव्यो, यतः स वशकारकः ॥३॥

किञ्च सर्वगुणसम्पन्नोऽपि भेदेन बध्यते । यतो हि—

अन्तःस्थेन विरुद्धेन सुवृत्तेनातिचारुणा ।
अन्तर्भिन्नेन संप्राप्तं मौक्तिकेनापि बन्धनम्' ॥४॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

एवं सम्प्रधार्य तस्याभिमुखो भूत्वा गर्वादुन्नतकन्धरः ससम्भ्रममुवाच—'मामम, कथमत्र भवान्मृत्युमुखे प्रविष्टः? येनैष गजः सिंहेन व्यापादितः। स च मामेतद्रक्षणे नियुज्य नदीं स्नानार्थं गतः। तेन च गच्छता मम समादिष्टम्—'यदि कश्चिदिह व्याघ्रः समायाति, त्वया सुगुप्तं ममावेदनीयम्। येन वनमिदं मया निर्व्याघ्रं कर्तव्यम्। यतः पूर्वं व्याघ्रेणैकेन मया व्यापादितो गजः शून्ये भक्षयित्वोच्छिष्टां नीतः। तदिनादारभ्य व्याघ्रान्प्रति कुपितोऽस्मि।' तच्छ्रुत्वा व्याघ्रः सन्त्रस्तस्तमाह—'भो भागिनेय, देहि मे प्राणदक्षिणाम्। त्वया तस्यात्र चिरायतस्यापि मदीया काऽपि वार्ता नाख्येया।' एवमभिधाय सत्वरं पलायांचक्रे। अथ गते व्याघ्रे तत्र कश्चिद् द्वीपी समायातः। तमपि दृष्ट्वाऽसौ व्यचिन्तयद्—'दृढदंष्ट्रोऽयं चित्रकः। तदस्य पार्श्वादस्य गजस्य यथा चर्मच्छेदो भवति तथा करोमि।' एवं निश्चित्य तमप्युवाच—'भो भगिनीसुत, किमिति चिराद् दृष्टोऽसि? कथं च बुभुक्षित इव लक्ष्यसे? तदतिथिरसि मे। एष गजः सिंहेन हतस्तिष्ठति। अहं चास्य तदादिष्टो रक्षपालः। तद् यावत्सिंहो न समायाति तावदस्य गजस्य मांसं भक्षयित्वा तृप्तिं कृत्वा द्रुततरं व्रज।' स आह—'मामम, यद्येवं तन्न कार्यं मे मांसाशनेन। यतो जीवन्नरो भद्रशतानि पश्यति। उक्तं च—

यच्छक्यं ग्रसितुं शस्तं ग्रस्तं परिणमेच्च यत्।
हितं च परिणामे यत्तदद्यं भूतिमिच्छता ॥५॥

तत्सर्वदा तदेव भुज्यते यदेव परिणमति। तदहमितोऽपयास्यामि।' शृगाल आह—'भो अधीर, विश्रब्धो भूत्वा भक्षय त्वम्। तस्यागमनं दूरतोऽपि तवाहं निवेदयिष्यामि।' तथानुष्ठिते द्वीपिना भिन्नां त्वचं विज्ञाय जम्बूकेनाभिहितम्—भो भगिनीसुत, गम्यताम्। एष सिंहः समायाति।' तच्छ्रुत्वा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चित्रको दूरं प्रनष्टः। अथ यावदसौ तद्भेदकृतद्वारेण किंचिन्मांसं भक्षयति तावदतिसंक्रुद्धोऽपरः शृगालः समाययौ। अथ तमात्मतुल्यपराक्रमं दृष्ट्वैतं श्लोकमपठद्—

'उत्तमं प्रणिपातेन शूरं भेदेन योजयेत्।
नीचमल्पप्रदानेन समशक्तिं पराक्रमैः' ॥६॥

ततश्च तदभिमुखप्रयाणः स्वदंष्ट्राभिस्तं विदार्य दिशोभागं कृत्वा स्वयं सुखेन चिरकालं हस्तिमांसं बुभुजे।

—पञ्चतन्त्रके लब्धप्रणाशे षष्ठी कथा।

४. वाचाटः कच्छपः।

अस्ति कस्मिंश्चिज्जलाशये कम्बुग्रीवो नाम कच्छपः। तस्य च संकटविकटनाम्नी मित्रे हंसजातीये परमस्नेहकोटिमाश्रिते नित्यमेव सरस्तीरमासाद्य तेन सहानेकदेवर्षिमहर्षीणां कथाः कृत्वा अस्तमनवेलायां स्वनीडसंश्रयं कुरुतः। अथ गच्छता कालेनावृष्टिवशात्सरः शनैः शनैः शोषमगमत्। ततस्तदूदुःखदुःखिनौ तावूचतुः—'भो मित्र, जम्बालशेषमेतत्सरः सञ्जातम्। तत्कथं भवान्भविष्यतीति व्याकुलत्वं नौ हृदि वर्तते।' तच्छ्रुत्वा कम्बुग्रीव आह—'भोः, साम्प्रतं नास्त्यस्माकं जीवितव्यं, जलाभावात्। तथाप्युपायश्चिन्त्यतामिति। उक्तं च—

त्याज्यं न धैर्यं विधुरेऽपि काले
धैर्यात्कदाचिद् गतिराप्यतेऽपि।
जाते समुद्रेऽपि च पोतभङ्गे
सांयात्रिको वाञ्छति वै तरीतुम् ॥१॥

अन्यच्च—

मित्रार्थे बान्धवार्थे च बुद्धिमान्यतते सदा।
जातास्वापत्सु यत्नेन जगादेदं वचो मनुः ॥२॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तदानीयतां कांचिद् दृढरज्जुर्लघुकाष्ठं वा। अन्विष्यतां च प्रभूतजलसनाथं सरो येन मया मध्यदेशे दन्तैर्गृहीते सति युवां कोटिभागयोस्तत्काष्ठं मया सहितं संगृह्य नयथः।' तावूचतुः—'भो मित्र, एवं करिष्यावः। परं भवता मौनव्रतेन स्थातव्यम्। नो चेत्तव काष्ठात्पातो भविष्यति।' तथानुष्ठिते गच्छता कम्बुग्रीवेणाधोभागव्यवस्थितं किंचित्पुरमालोकितम्। अथ पौरास्तं तथा नीयमानं विलोक्य सविस्मयमिदमूचुः—'अहो, चक्राकारं किमपि पक्षिभ्यां नीयते, पश्यत पश्यत।' अथ तेषां कोलाहलमाकर्ण्य कम्बुग्रीवो, 'भोः, किमेवं कोलाहलः' इति वक्तुकामो यावन्मुखं व्यादत्ते तावदेव काष्ठाद् भ्रष्टो भूमिं पतित्वा खण्डशो जातो विलोकितः पौरैः। उक्तं च—

सुहृदां हितकामानां न करोतीह यो वचः।
स कूर्म इव दुर्बुद्धिः काष्ठाद् भ्रष्टो विनश्यति ॥ ३ ॥

— पञ्चतन्त्रके मित्रभेदे दशमी कथा।

५. राजप्राप्तौ भेकानामसन्तोषस्तत्फलं च।

कस्मिंश्चित्कासारे निवसन्तो भेका एकदा समेत्य मन्त्रयांचक्रिरे—'नैतद्युक्तं यद्वयं स्वैरं चरामो यथेष्टं कुर्मश्च। यद्यस्माकं कोऽपि स्वामी स्यात्तर्हि समीचीनं भवेद्। यतस्तस्य तन्त्रे वयं वर्तिष्यामहे।' ततः सर्वे मिलित्वा विष्णुं प्रार्थयांचक्रिरे—'भो भगवन्, राजानं देहि' इति। विष्णुरपि तेषां वचोऽङ्गीकृत्य 'गृह्णीतैतदि'त्याभाष्य दारुखण्डमेकं वियतोऽपातयत्। तस्मिन्पतिते तदाघातेन समन्ताज्जलमालोडितं, महाञ्शब्दश्चाभूत्। भीतिग्रस्तास्ते तस्मादारान्नेयुः। कतिपयैः क्षणैस्तन्निश्चलं बभूव। ततो निश्चेष्टं तद् दृष्ट्वा शनैः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri
शनैस्तदुपजग्मुस्तदारुरुहुस्तेन सम चिक्रीडुश्च। तदाऽयेतनोऽयं राजा नापेक्षितः, अस्मात्साधुतरो राजा याचनीयः' इति मिथः संमन्त्र्य भूयोऽपि विष्णुं तुष्टुवुः। ततो विष्णुः क्रौञ्चं प्रैषिषत्। स आगत एव मण्डूकान्विदार्यात्तुमारेभे। तदा सकलकुलनाशमसहमानाः पुनर्विष्णुं प्रार्थितवन्तः 'इतोऽन्यः कश्चिद्राजा प्रेष्यताम्। अथ वा पूर्वावस्थाभाजो वयं विधेयाः'। विष्णुस्तच्छ्रुत्वोवाच—'नाहमिदानीमेवं करोमि। यो मया प्रथमं दत्तः स वो नारुचद्। अतः स्वापराधस्य फलं भुज्यताम्'ति।

तात्पर्यम्—

यस्यां स्थितौ भगवाञ्ज्ञनं स्थापयति सा तेन न गर्हणीयान्या च न वाञ्छनीया। वाञ्छिता चेद्यादृशीमाप्नुयात्तादृशीमुपभुञ्ज्यात्। तत्र भगवन्तं नोपालभेत। य एकं राजानमप्रियं मत्वाऽन्यमिच्छन्ति त एव तस्य वशे व्रजन्ति। यदि सोऽर्दयति तर्हि कस्तत्रोपालभ्यः?

—ईसब्नीतिकथासु।

६. वृकशिशोः शाठ्यम्।

एकदा घर्मकाल आतपक्लान्त एकोऽजशिशुः पिपासार्दितो भूत्वा जलं पातुमदूरवर्तिनीमल्पसरितमगमत्। तत्रोन्नतदेशे जलं पिबन्तं वृकमीक्षित्वा निम्नप्रदेशभाग्जलमादातुमारेभे। वृकस्तु दूरात्तं दृष्ट्वा, 'केनापि निमित्तेन कलहमुत्पाद्याहमेनं व्यापादयामि भक्षयामि चे'ति मनसि चकार। ततस्तमभिगत्योचे—'आः पाप, कथं मया तृट्शमः कर्तव्यो यद्येवं जलमाविलयसि? किंनिमित्तोऽयमनुचितारम्भः, इति तूर्णं निवेदय, नो चेद्वध्योऽसि।' भीतः सोऽजशिशुः सविनयमवादीद्—'भो वृकश्रेष्ठ, यदत्रभवान् वदति तत्कथं भवेत्?

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri
त्वत्तो यज्जलं वहति तदहं पिबामि। एवं स्थितं मया कलुषितं जलं प्रतीपं त्वां कथं प्रवहेत्?' वृकोऽवादीद्—'अस्तु नामैतत्। त्वमधमोऽसि। षण्मासात्प्राङ् मा त्वमशप इत्यहमशृणवम्।' स शिशुरवादीद्—'हा कष्टम्। कथमस्य संभवः? यस्य जातस्य मम मासत्रयमपि न पूर्णं, सोऽहं षण्मासात्प्राग्भवन्तमशपमिति कथं संभवेद्? वृकोऽत्रापि निरुत्तरोऽभूत्। ततो महतावेशेन नेत्रं विस्फार्य दन्तैर्दन्तान्विघट्टयन्पादाघातैर्भुवं कम्पयन्निव तमुपसंगम्य तारस्वरेणावोचद्—'भो दास्याः पुत्र, यदि त्वं नाशाप्सीस्तर्हि शप्त्वा तव पित्रा भाव्यम्। नो विशेषः।' एवमुक्त्वा स तं दीनमवधीत्।

तात्पर्यम्—

दुष्टाशयस्य बलवतोऽग्रे, 'सत्यं मां त्रासयेद्' इति दुर्बलो न तिष्ठेत्।

—ईसब्नीतिकथासु।

७. आर्यकापहरणम्।

(ततः प्रविशति चारुदत्तो विदूषकश्च।)

विदूषकः—भोः, पश्य पश्य। पुष्पकरण्डक-जीर्णोद्यानस्य सश्रीकताम्।

चारुदत्तः—वयस्य, एवमेतत्। तथा हि—

वणिज इव भान्ति तरवः पण्यानीव स्थितानि कुसुमानि।
शुल्कमिव साधयन्तो मधुकरपुरुषाः प्रविचरन्ति ॥ १ ॥

विदूषकः—भोः, इदमसंस्काररमणीयं शिलातलमुपविशतु भवान्।

चारुदत्तः—(उपविश्य) वयस्य, चिरायति वर्धमानकः।

Dr. Urmila Sharma Collection, Varanasi

CC-0. Prof. Satya Vrat Shastri Collection, Delhi. Digitized by eGangotri

विदूषकः—भणितो मया वर्धमानकः 'वसन्तसेनां गृहीत्वा लघु लघ्वागच्छ' इति।

चारुदत्तः—तत्किं चिरायति?

किं यात्यस्य पुरःशनैःप्रवहणं तस्यान्तरं मार्गते?
भग्नेऽक्षे परिवर्तनं प्रकुरुते छिन्नोऽथवा प्रग्रहः?
वर्त्मान्तोज्झितदारुवारितगतिर्मार्गान्तरं याचते?
स्वैरं प्रेषितगोयुगः किमथवा स्वच्छन्दमागच्छति॥२॥

चेटः—(प्रविश्य गुप्तार्यकप्रवहणस्थः) यातं गावौ, यातम्। आर्यकः—(स्वगतम्)

नरपतिपुरुषाणां दर्शनाद् भीतभीतः,
सनिगडचरणत्वात्सावशेषापसारः।
अविदितमधिरूढो यामि साधोस्तु याने,
परभृत इव नीडे रक्षितो वायसीभिः॥३॥

अहो, नगरात्सुदूरमपक्रान्तोऽस्मि। तत्किमस्मात्प्रवहणादवतीर्य वृक्षवाटिकागहनं प्रविशामि, उताहो प्रवहणस्वामिनं पश्यामि? अथवा कृतं वृक्षवाटिकागहनेन। अभ्युपपन्नवत्सलः खलु तत्रभवानार्यचारुदत्तः श्रूयते। तत्प्रत्यक्षीकृत्य गच्छामि।

स तावदेतद्व्यसनार्णवोत्थितं,
निरीक्ष्य साधुः समुपैति निर्वृतिम्।
शरीरमेतद् गतमीदृशीं दशां
धृतं मया तस्य महात्मनो गुणैः॥४॥

चेटः—इदं तदुद्यानम्। यावदुपसर्पामि। (उपसृत्य) आर्य मैत्रेय,

विदूषकः—भोः, प्रियं ते निवेदयामि। वर्धमानको मन्त्रयति। (आगतया वसन्तसेनया भवितव्यम्।)

चारुदत्तः—प्रियं नः प्रियम्।

विदूषकः—दास्याःपुत्र, किं चिरायितोऽसि?

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चेटः—आर्यमैत्रेय, मा कुप्य। यानास्तरणं विस्मृतमिति कृत्वा गतागतिं कुर्वंश्चिरायितोऽस्मि।

चारुदत्तः—वर्धमानक, परिवर्तय प्रवहणम्। सखे मैत्रेय, अवतारय वसन्तसेनाम्।

विदूषकः—किं निगडेन बद्धावस्याः पादौ येन स्वयं नावतरति? (उत्थाय प्रवहणमुद्घाट्य) भोः, न वसन्तसेना, वसन्तसेनः खल्वेषः।

चारुदत्तः—वयस्य, अलं परिहासेन। न कालमपेक्षते स्नेहः। अथवा स्वयमेवावतारयामि। (इत्युत्तिष्ठति।)

आर्यकः—(दृष्ट्वा) अये! अयमेव प्रवहणस्वामी। न केवलं श्रुतिरमणीयो दृष्टिरमणीयोऽपि। हन्त, रक्षितोऽस्मि।

चारुदत्तः—(प्रवहणमधिरुह्य दृष्ट्वा च) अये, तत्कोऽयम्?

करिकरसमबाहुः सिंहपीनोन्नतांसः,
पृथुतरसमवक्षास्ताम्रलोलायताक्षः।
कथमिदमसमानं प्राप्त एवंविधो यो
वहति निगडमेकं पादलग्नं महात्मा ॥५॥

आर्यकः—शरणागतो गोपालप्रकृतिरार्यकोऽस्मि।

चारुदत्तः—किं घोषादानीय योऽसौ राज्ञा पालकेन बद्धः?

आर्यकः—अथ किम्।

चारुदत्तः—

विधिनैवोपनीतस्त्वं चक्षुर्विषयमागतः।
अपि प्राणानहं जह्यां न तु त्वां शरणागतम् ॥६॥

(आर्यको हर्षं नाटयति।)

चारुदत्तः—वर्धमानक, चरणान्निगडमपनय।

चेटः—यथार्य आज्ञापयति। (तथा कृत्वा) आर्य, अपनीतानि निगडानि।

आर्यकः—स्नेहमयान्यन्यानि दृढतराणि दत्तानि।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विदूषकः—संगच्छस्व निगडानि। एषोऽपि मुक्तः। साम्प्रतं वयं व्रजिष्यामः।

चारुदत्तः—धिक्शान्तम्।

आर्यकः—सखे चारुदत्त, अहमपि प्रणयेनेदं प्रवहणमारूढः। तत्क्षन्तव्यम्।

चारुदत्तः—अलंकृतोऽस्मि स्वयंग्राहप्रणयेन भवता।

आर्यकः—अभ्यनुज्ञातो भवता गन्तुमिच्छामि।

चारुदत्तः—गम्यताम्।

आर्यकः—भवतु। अवतरामि।

चारुदत्तः—सखे, नावतरितव्यम्। प्रत्यग्रापनीतसंयमनस्य भवतोऽलघुसञ्चारा गतिः। सुलभपुरुषसञ्चारेऽस्मिन्प्रदेशे प्रवहणं विश्वासमुत्पादयति। तत्प्रवहणेनैव गम्यताम्।

आर्यकः—यथाह भवान्।

चारुदत्तः—क्षेमेण व्रज बान्धवान्,

आर्यकः—ननु मया लब्धो भवान्बान्धवः,

चारुदत्तः—स्मर्तव्योऽस्मि कथान्तरेषु भवता,

आर्यकः—स्वात्माऽपि विस्मर्यते ?

चारुदत्तः—त्वां रक्षन्तु पथि प्रयान्तममराः,

आर्यकः—संरक्षितोऽहं त्वया,

चारुदत्तः—स्वैर्भाग्यैः परिरक्षितोऽसि

आर्यकः—ननु भोस्तत्रापि हेतुर्भवान् ॥७॥

चारुदत्तः—यदुच्यते पालके महती रक्षा न वर्तते, तच्छीघ्रमपक्रामतु भवान्।

आर्यकः—एवं, पुनर्दर्शनाय। (इति निष्क्रान्तः।)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चारुदत्तः—कृत्वैवं मनुजपतेर्महद् व्यलीकं,
स्थातुं हि क्षणमपि न प्रशस्तमत्र।
मैत्रेय! क्षिप निगडं पुराणकूपे,
पश्येयुः क्षितिपतयो हि चारदृष्ट्या ॥८॥

(वामाक्षिस्पन्दनं सूचयित्वा) सखे मैत्रेय, वसन्तसेनादर्शनोत्सुकोऽयं जनः। पश्य—

अपश्यतोऽद्य तां कान्तां वामं स्फुरति लोचनम्।
अकारणपरित्रस्तं हृदयं व्यथते मम ॥९॥

तदेहि। गच्छावः। (परिक्रम्य) कथमभिमुखमनाभ्युदयिकं श्रमणदर्शनम्? (विचार्य) प्रविशत्वयमनेन पथा। वयमप्यनेनैव पथा गच्छामः।

(इति निष्क्रान्तौ।)

—मृच्छकटिके सप्तमोऽङ्कः।

८. भीमसेनस्य कोपः।

(उभौ भीमसेनसहदेवौ प्रवेशं नाटयतः।)

सहदेवः—(ससम्भ्रमम्) आर्य, इदमासनमास्तीर्णम्। अत्रोपविशत्वार्यः। प्रतिपालयतु कृष्णागमनम्।

भीमसेनः—वत्स, 'कृष्णागमन' मित्यनेनोपोद्घातेन स्मृतम्। अथ भगवान्कृष्णः केन प्रकारेण सन्धिं कर्तुं सुयोधनं प्रति प्रहितः?

सहदेवः—आर्य, पञ्चभिर्ग्रामैः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भीमसेनः—(कर्णौ पिधाय) अहह ! देवस्याजातशत्रोरप्ययमीदृशस्तेजोऽपकर्ष इति यत्सत्यं कम्पितमिव मे हृदयम् । (परिवृत्य स्थित्वा) न त्वया कथितं न च मया भीमेन श्रुतम् ।

यत्तदूर्जितमत्युग्रं क्षात्रं तेजोऽस्य भूपतेः ।
दीव्यताक्षैस्तदानेन नूनं तदपि हारितम् ॥ १ ॥

(नेपथ्ये) समाश्वसितु, समाश्वसितु भट्टिनी ।

सहदेवः—(नेपथ्याभिमुखमवलोक्यात्मगतम्) अये, कथं याज्ञसेनी मुहुरुपचीयमानवाष्पपटलस्थगितनयना आर्यसमीपमुपसर्पति । तत्कष्टतरमापतितम् ।

यद्वैद्युतमिव ज्योतिरार्यं कुद्धेऽद्य संभृतम् ।
तत्प्रावृडिव कृष्णेयं नूनं संवर्धयिष्यति ॥ २ ॥

(ततः प्रविशति यथानिर्दिष्टा द्रौपदी चेटी च । द्रौपदी साश्रं निःश्वसिति ।)

चेटी—समाश्वसितु समाश्वसितु भट्टिनी । अपनेष्यति ते मन्युं नित्यानुबद्धकुरुवैरः कुमारो भीमसेनः ।

द्रौपदी—हञ्जे बुद्धिमतिके, भवत्येतद्यदि महाराजः प्रतिकूलो न भवेत् ।

चेटी—(विलोक्य) एष कुमारस्तिष्ठति । तदेनमुपसर्पतु भट्टिनी ।

द्रौपदी—हञ्जे, एवं कुर्वः । (इति परिक्रामतः ।)

द्रौपदी—हञ्जे, कथय नाथस्य ममागतम् ।

चेटी—यद् देव्याज्ञापयति । (इति परिक्रामति ।)
(भीमसेनमुपसृत्य) जयतु जयतु कुमारः ।

(भीमसेनः कोपादश्रुण्वन्नेव तिष्ठति ।)

चेटी—(परिवृत्य) भट्टिनि, प्रियं ते निवेदयामि । परिकुपित इव कुमारो लक्ष्यते ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

द्रौपदी—हञ्ज, यद्यवं तदवधीरणाऽप्येषा मामाश्वासयति। तदेकान्त उपविष्टा भूत्वा शृणोमि तावन्नाथस्य व्यवसितम्। (उभे तथा कुरुतः।)

भीमसेनः—(सक्रोधं सहदेवमधिकृत्य) किं नाम पञ्चभिर्ग्रामैः सन्धिः ?

मशामि कौरवशतं समरे न कोपाद्—
दुःशासनस्य रुधिरं न पिबाम्युरस्तः।
संचूर्णयामि गदया न सुयोधनोरू
सन्धिं करोतु भवतां नृपतिः पणेन ॥ ३ ॥

द्रौपदी—(सहर्षं जनान्तिकम्) नाथ, अश्रुतपूर्वं खलु न ईदृशं ते वचनम्। तत्पुनरपि तावद् भण (भीमसेनोऽशृण्वन्नेव पद्यं पुनः पठति।)

सहदेवः—आर्य, किं महाराजस्य सन्देशोऽयमार्येणाव्युत्पन्न इव गृहीतः ?

भीमसेनः—का पुनरत्र व्युत्पत्तिः ?

सहदेवः—आर्य, एवं गुरुणा सन्दिष्टम्।

भीमसेनः—कस्य ?

सहदेवः—सुयोधनस्य।

भीमसेनः—किमिति ?

सहदेवः—इन्द्रप्रस्थं वृकप्रस्थं जयन्तं वारणावतम्।
प्रयच्छ चतुरो ग्रामान् कञ्चिदेकं च पञ्चमम् ॥४॥

भीमसेनः—ततः किम् ?

सहदेवः—तदेवमनया प्रतिनामग्रामप्रार्थनया पञ्चमस्य चाकीर्तनाद् विषभोजनजतुगृहदाहद्यूतसभाद्यपकारस्थानोद्घाटनमेव मन्ये।

भीमसेनः—(साटोपम्) वत्स, एवं कृते किं भवति ?

सहदेवः—आर्य, एवं कृते लोके तावत्स्वगोत्रक्षयाशङ्कि हृदयमाविष्कृतं भवति कुरुराजस्यासन्धेयता च प्रति-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भीमसेनः—(कर्णौ पिधाय) अहह ! देवस्याजातशत्रोरप्ययमीदृशस्तेजोऽपकर्षं इति यत्सत्यं कम्पितमिव मे हृदयम् । (परिवृत्य स्थित्वा) न त्वया कथितं न च मया भीमेन श्रुतम् ।

यत्तद्वूर्जितमत्युग्रं क्षात्रं तेजोऽस्य भूपतेः ।
दीव्यताक्षैस्तदानेन नूनं तदपि हारितम् ॥ १ ॥

(नेपथ्ये) समाश्वसितु समाश्वसितु भट्टिनी ।

सहदेवः—(नेपथ्याभिमुखमवलोक्यात्मगतम्) अये, कथं याज्ञसेनी मुहुरुपचीयमानवाष्पपटलस्थगितनयना आर्यसमीपमुपसर्पति । तत्कष्टतरमापतितम् ।

यद्वैद्युतमिव ज्योतिरार्ये क्रुद्धेऽद्य संभृतम् ।
तत्प्रावृडिव कृष्णेयं नूनं संवर्धयिष्यति ॥ २ ॥

(ततः प्रविशति यथानिर्दिष्टा द्रौपदी चेटी च । द्रौपदी साश्रु निःश्वसिति ।)

चेटी—समाश्वसितु समाश्वसितु भट्टिनी । अपनेष्यति ते मन्युं नित्यानुबद्धकुरुवैरः कुमारो भीमसेनः ।

द्रौपदी—हञ्जे बुद्धिमतिके, भवत्येतद्यदि महाराजः प्रतिकूलो न भवेत् ।

चेटी—(विलोक्य) एष कुमारस्तिष्ठति । तदेनमुपसर्पतु भट्टिनी ।

द्रौपदी—हञ्जे, एवं कुर्वः । (इति परिक्रामतः ।)

द्रौपदी—हञ्जे, कथय नाथस्य ममागतम् ।

चेटी—यद् देव्याज्ञापयति । (इति परिक्रामति ।)
(भीमसेनमुपसृत्य) जयतु जयतु कुमारः ।
(भीमसेनः कोपादश्रृण्वन्नेव तिष्ठति ।)

चेटी—(परिवृत्य) भट्टिनि, प्रियं ते निवेदयामि । परिकुपित इव कुमारो लक्ष्यते ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

द्रौपदी—हञ्ज, यद्ययं तदवधीरणाऽप्येषा मामाश्वासयति। तदेकान्त उपविष्टा भूत्वा शृणोमि तावन्नाथस्य व्यवसितम्। (उभे तथा कुरुतः।)

भीमसेनः—(सक्रोधं सहदेवमधिकृत्य) किं नाम पञ्चभिर्ग्रामैः सन्धिः ?

मश्नामि कौरवशतं समरे न कोपाद्-
दुःशासनस्य रुधिरं न पिबाम्युरस्तः।
संचूर्णयामि गदया न सुयोधनोरू
सन्धिं करोतु भवतां नृपतिः पणेन॥ ३॥

द्रौपदी—(सहर्षं जनान्तिकम्) नाथ, अश्रुतपूर्वं खलु न ईदृशं ते वचनम्। तत्पुनरपि तावद् भण (भीमसेनोऽशृण्वन्नेव पद्यं पुनः पठति।)

सहदेवः—आर्य, किं महाराजस्य सन्देशोऽयमार्येणाव्युत्पन्न इव गृहीतः ?

भीमसेनः—का पुनरत्र व्युत्पत्तिः ?

सहदेवः—आर्य, एवं गुरुणा सन्दिष्टम्।

भीमसेनः—कस्य ?

सहदेवः—सुयोधनस्य।

भीमसेनः—किमिति ?

सहदेवः—इन्द्रप्रस्थं वृकप्रस्थं जयन्तं वारणावतम्।
प्रयच्छ चतुरो ग्रामान् कञ्चिदेकं च पञ्चमम्॥४॥

भीमसेनः—ततः किम् ?

सहदेवः—तदेवमनया प्रतिनामग्रामप्रार्थनया पञ्चमस्य चाकीर्तनाद् विषभोजनजतुगृहदाहद्यूतसभाद्यपकारस्थानोद्घाटनमेव मन्ये।

भीमसेनः—(साटोपम्) वत्स, एवं कृते किं भवति ?

सहदेवः—आर्य, एवं कृते लोके तावत्स्वगोत्रक्षयाशङ्कि हृदयमाविष्कृतं भवति कुरुराजस्यासन्धेयता च प्रति-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पादिता भवति।

भीमसेनः—मूढ, सर्वमप्येतदनर्थकम्। कुरुराजस्य तावदसन्धेयता तदैव प्रतिपादिता यदैवास्माभिरितो वनं गच्छद्भिः सर्वैरेव कुरुकुलस्य निधनं प्रतिज्ञातम्। प्रसिद्धश्च लोकेऽपि धार्तराष्ट्रकुलक्षयः।

(सहदेवो लज्जां नाटयति।)

भीमसेनः—स किं लज्जाकरो भवताम्? अपि रे मूर्ख,

युष्मान्हेपयति क्रोधाल्लोके शत्रुकुलक्षयः।
न लज्जयति दाराणां सभायां केशकर्षणम्॥५॥

द्रौपदी—(जनान्तिकम्) नाथ, न लज्जन्त एते। त्वमपि तावन्मा विस्मार्षीः।

भीमसेनः—(सस्मरणम्) वत्स, कथं चिरायति पाञ्चाली?

सहदेवः—आर्य, का खलु वेलाऽत्रभवत्याः प्राप्तायाः। किन्तु रोषावेशवशादागताप्यार्येण नोपलक्षिता।

भीमसेनः—(दृष्ट्वा सादरम्) देवि, समुद्धतामर्षरस्माभिरागतापि भवती नोपलक्षिता। अतो न मन्युं कर्तुमर्हसि।

द्रौपदी—नाथ, उदासीनेषु युष्मासु मम मन्युर्न पुनः कुपितेषु।

भीमसेनः—यद्येवमपगतपरिभवमात्मानं समर्थयस्व। (हस्ते गृहीत्वा पार्श्वे समुपवेश्य मुखमवलोक्य) किमत्रभवतीमुद्विग्नामिवोपलक्षयामि?

द्रौपदी—नाथ, किमुद्वेगकारणं युष्मासु सन्निहितेषु?

भीमसेनः—किमिति नावेदयसि? (केशानवलोक्य।) अथवा किमावेदितेन?

जीवत्सु पाण्डुपुत्रेषु दूरमप्रेषितेष्वपि।
पाञ्चालराजतनया वहते यदिमां दशाम्॥६॥

द्रौपदी—हञ्जे बुद्धिमतिके, कथय नाथाय। कोऽन्यो मम परिभवेन खिद्यते?

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चेटी—यद्देव्याज्ञापयति। शृणोतु कुमारः। इतोऽप्यधिकतरमद्योद्वेगकारणमभूद्देव्याः।

भीमसेनः—किं नामास्मादप्यधिकतरम्? बुद्धिमतिके, कथय कौरव्यवंशदावेऽस्मिन्क एष शलभायते।

मुक्तवेणीं स्पृशन्नेनां कृष्णां धूमशिखामिव ॥ ७॥

चेटी—शृणोतु कुमारः। अद्य खलु देव्यम्बासहिता सुभद्राप्रमुखेण सपत्नीवर्गेण परिवृता, आर्याया गान्धार्याः पादवन्दनं कर्तुं गता। ततः प्रतिनिवर्तमाना भानुमत्या दृष्टा। ततस्तया देवीं प्रेक्ष्य सगर्वमीषद् विहस्य भणितम्—

भीमसेनः—आः, शत्रुभार्यया? हन्त, स्थानं क्रोधस्य। ततस्ततः?

चेटी—'अयि याज्ञसेनि, पञ्चग्रामप्रार्थनायां सत्यामपि कथं ते केशा असंयमिताः?' इति।

भीमसेनः—बुद्धिमतिके, तदा देव्या किमभिहितम्?

चेटी—कुमार, यदि परिजनहीना भवेत्तदा देवी भणति।

भीमसेनः—किं पुनरभिहितं भवत्या?

चेटी—इत्थम्—'अयि भानुमति, युष्माकममुक्तेषु केशहस्तेषु कथमस्माकं देव्याः केशाः संयम्यन्ते?' इति।

भीमसेनः—(सपरितोषम्) साधु। परिजनोचितं निगदितम्। अयि पाञ्चालराजतनये, श्रूयताम्। अचिरेणैव कालेन—

चञ्चद्भुजभ्रमितचण्डगदाभिघात—
संचूर्णितोरुयुगलस्य सुयोधनस्य।
स्त्यानावनद्धघनशोणितशोणपाणि—
रुत्तंसयिष्यति कचांस्तव देवि भीमः ॥ ८॥

—वेणीसंहारे प्रथमेऽङ्के।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

१. शकुन्तलादुष्यन्तयोः प्रथमः समागमः।

राजा—(सत्वरमुपसृत्य)

कः पौरवे वसुमतीं शासति शासितरि दुर्विनीतानाम्।
अयमाचरत्यविनयं मुग्धासु तपस्विकन्यासु ॥ १ ॥

(सर्वा राजानं दृष्ट्वा किंचिदिव सम्भ्रान्ताः।)

अनसूया—आर्ये, न खलु किमप्यत्याहितम्। इयं नौ प्रियसखी मधुकरेणाभिभूयमाना कातरीभूता। (शकुन्तलां दर्शयति।)

राजा—(शकुन्तलाभिमुखो भूत्वा) अपि तपो वर्धते?

(शकुन्तला साध्वसादवचना तिष्ठति।)

अनसूया—इदानीमतिथिविशेषलाभेन। हला शकुन्तले, गच्छोटजम्। फलमिश्रमर्घमुपहर। इदं पादोदकं भविष्यति।

राजा—भवतीनां सूनृतयैव गिरा कृतमातिथ्यम्।

प्रियंवदा—तेन ह्यस्यां प्रच्छायशीतलायां सप्तपर्णवेदिकायां मुहूर्तमुपविश्य परिश्रमविनोदं करोत्वार्यः।

राजा—ननु यूयमप्यनेन कर्मणा परिश्रान्ताः।

अनसूया—हला शकुन्तले, उचितं नः पर्युपासनमतिथीनाम्। अत्रोपविशामः। (सर्वा उपविशन्ति।)

शकुन्तला—(आत्मगतम्) किं नु खल्विमं प्रेक्ष्य तपोवनविरोधिनो विकारस्य गमनीयास्मि संवृत्ता?

राजा—(सर्वा विलोक्य) अहो, समवयोरूपरमणीयं भवतीनां सौहार्दम्।

प्रियंवदा—(जनान्तिकम्) अनसूये, को नु खल्वेष चतुरगम्भीराकृतिर्मधुरं प्रियमालपन्प्रभाववानिव लक्ष्यते?

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अनसूया—सखि, ममाप्यस्ति कौतूहलम्। द्रक्ष्यामि तावदेनम्। (प्रकाशम्) आर्यस्य मधुरालापजनितो विस्रम्भो मां मन्त्रयते। कतम आर्येण राजर्षिवंशोऽलङ्क्रियते? कतमो वा विरहपर्युत्सुकजनः कृतो देशः? किं-निमित्तं वा सुकुमारतरोऽपि तपोवनगमनपरिश्रम-स्यात्मा पदं नीतः?

शकुन्तला—(आत्मगतम्) हृदय, मोत्ताम्य। एषा त्वया चिन्तित-मनसूया मन्त्रयते।

राजा—(आत्मगतम्) कथमिदानीमात्मानं निवेदयामि, कथं वाऽत्मापहारं करोमि? भवतु। एवं तावदेनां वक्ष्ये। (प्रकाशम्) भवति, यः पौरवेण राज्ञा धर्मा-धिकारे नियुक्तः सोऽहमविघ्नक्रियोपलम्भाय धर्मा-रण्यमिदमायातः।

अनसूया—सनाथा इदानीं धर्मचारिणः। (शकुन्तला भ्रूभङ्गारलज्जां रूपयति।)

सख्यौ—(उभयोराकारं विदित्वा जनान्तिकम्) हला शकुन्तले, यद्य-त्राद्य तातः सन्निहितो भवेत्।

शकुन्तला—ततः किं भवेत्?

सख्यौ—इमं जीवितसर्वस्वेनाप्यतिथिविशेषं कृतार्थं करिष्यति।

शकुन्तला—युवामपेतम्। किमपि हृदये कृत्वा मन्त्रयेथे। न युवयोर्वचनं श्रोष्यामि।

राजा—वयमपि तावद् भवत्योः सखीगतं किमपि पृच्छामः।

सख्यौ—आर्य, अनुग्रह एवेयमभ्यर्थना।

राजा—भगवान्काश्यपः शाश्वते ब्रह्मणि स्थित इति प्रकाशः। इयं च वः सखी तदात्मजेति कथमेतत्?

अनसूया—शृणोत्वार्यः। अस्ति कोऽपि कौशिक इति गोत्र-नामधेयो महाप्रभावो राजर्षिः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

राजा—अस्ति। श्रूयते।

अनसूया—तमावयोः प्रियसख्याः प्रभवमवगच्छ। उज्झितायाः शरीरसंवर्धनादिभिस्तातकाश्यपोऽस्याः पिता।

राजा—उज्झितशब्देन जनितं मे कौतूहलम्। आमूलाच्छ्रोतुमिच्छामि।

अनसूया—शृणोत्वार्यः। पुरा किल तस्य राजर्षेरुग्रे तपसि वर्तमानस्य किमपि जातशङ्कैर्देवैर्मेनका नामाप्सराः प्रेषिता नियमविघ्नकारिणी।

राजा—अस्त्येतदन्यसमाधिभीरुत्वं देवानाम्।

अनसूया—ततो वसन्तावतारसमये तस्या उन्मादयितृकं रूपं प्रेक्ष्य—

राजा—परस्ताज्ज्ञायत एव। सर्वथाऽप्सरःसंभवैषा।

अनसूया—अथ किम्।

राजा—उपपद्यते।

मानुषीषु कथं वा स्यादस्य रूपस्य संभवः।
न प्रभातरलं ज्योतिरुदेति वसुधातलात् ॥ २॥

(शकुन्तलाऽधोमुखी तिष्ठति।)

राजा—(आत्मगतम्) लब्धावकाशो मे मनोरथः। किन्तु सख्याः परिहासोदाहृतां वरप्रार्थनां श्रुत्वा धृतद्वैधीभावकातरं मे मनः।

—अभिज्ञानशाकुन्तले प्रथमेऽङ्के।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

१०. सोमेश्वरतीर्थयात्रा ।

अथानन्तरं श्रीमयणल्लदेव्या जातिस्मरणात्पूर्वभववृत्तान्ते श्रीसिद्धराजस्य निवेदिते श्रीमयणल्लदेवी श्रीसोमनाथयोग्यां सपादकोटिमूल्यां हेममयीं पूजामादाय यात्रायां प्रस्थिता। बाहुलोडनगरं प्राप्ता पञ्चकुलेन कदर्थ्यमानेषु कार्पटिकेषु राजदेयविभागस्याप्राप्त्या सबाष्पं पश्चान्निवर्त्यमानेषु मयणल्लदेवी हृदयादर्शसङ्क्रान्ततदूबाधा स्वयमेव पश्चादूव्याघुटन्ती अन्तरान्तरायभूतेन श्रीसिद्धराजेन विज्ञप्ता—'स्वामिनि अलममुना सम्भ्रमेण। कुतो हेतोः पश्चान्निवर्त्यते?' राजमाता प्राह, 'यदैव सर्वथाऽयं करमोक्षो भवति तदैवाहं श्रीसोमेश्वरं प्रणमामि, अशनं गृह्णामि, नान्यथा'। इति श्रुत्वा राजा पञ्चकुलमाकार्य तत्पट्टकस्याङ्के द्वासप्ततिलक्षानुत्पद्यमानान्विमृश्य तं पट्टकं विदार्य मातुः श्रेयसे तं करं मुक्त्वा करे जलचुलुकं मुञ्चति स्म।

ततः श्रीसोमेश्वरं गत्वा सा सुवर्णपूजया देवमभ्यर्च्य तुलापुरुषगजदानादीनि महादानानि दत्तवती।

संग्रहैकपरः प्राप समुद्रोऽपि रसातलम्।
दाता तु जलदः पश्य भुवनोपरि गर्जति॥ १॥

सेनाङ्गपरिवाराद्यं सर्वमेव विनश्यति।
दानेन जनितानन्दे कीर्तिरेकैव तिष्ठति॥ २॥

दातुर्नार्थिसमो बन्धुर्भारमादाय यः परात्।
लक्ष्मीरूपादविगमं निस्तारयति तं खलु॥ ३॥

'अतो महादानैर्मत्सदृशी काऽपि नाभून्न भविते'ति दर्पाध्माता निशि निर्भरं सुप्ता तपस्विवेषधारिणा तेनैव देवेन

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जगदे—'इहैव मदीयदेवकुलमध्ये काचित्कार्पटिकनितम्बिनी यात्रायै आयातास्ति। तस्याः सुकृतं याचनीयं त्वया।' इत्थमादिश्य तिरोहिते तस्मिन् राजपुरुषैरालोक्य समानीता। तत्पुण्यं याच्यमानमप्यददाना, कथमपि 'यात्रायां किं व्ययीकृत'मिति पृष्टा सती सा प्राह—'अहं भिक्षावृत्त्या योजनशतान्तरमतिक्रम्य ह्यस्तनदिवसे कृततीर्थोपवासा पारणकदिने कस्यापि सुकृतिनः पिण्याकमासाद्य तत्खण्डेन श्रीसोमेश्वरमभ्यर्च्य तदंशमतिथये दत्त्वा स्वयं पारणमकार्षम्। भवती पुण्यवती यस्याः पितृभ्रातरौ पतिसुतौ च राजानः। या बाहुलोडकरं द्वासप्ततिलक्षान् मोचयित्वा सपादकोटिमूल्यया पूजया श्रीसोमेश्वरं पूजितवती सा त्वं मदीयपुण्ये कृशेऽपि कथं लुब्धाऽसि? यदि न कुप्यसि तदा किञ्चिद् वच्मि तत्त्वतस्तव पुण्यान्मदीयं पुण्यं महीतले महीयः। यतः—

सम्पत्तौ नियमः शक्तौ सहनं यौवने व्रतम्।
दारिद्र्ये दानमत्यल्पमपि लाभाय भूयसे'॥ ४॥

इति युक्तियुक्तेन वाक्येन सा तस्या गर्वं निराचकार।

—श्रीमेरुतुङ्गाचार्यस्य प्रबन्धचिन्तामणौ तृतीये प्रकाशे।

११. द द द।

त्रयाः प्राजापत्याः प्रजापतौ पितरि ब्रह्मचर्यमूषुर्देवा मनुष्या असुराः। उषित्वा ब्रह्मचर्यं देवा ऊचुः—'ब्रवीतु नो भवानि'ति। तेभ्यो हैतदक्षरमुवाच—'द' इति। 'व्यज्ञासिष्ट?' इति। 'व्यज्ञासिष्मे'ति होचुः। 'दाम्यतेति न आत्थे'ति। 'ओमिति' होवाच। 'व्यज्ञासिष्टे'ति।

अथ हैनं मनुष्या ऊचुः—'ब्रवीतु नो भवानि'ति। तेभ्यो

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हैतदक्षरमुवाच 'द' इति। 'व्यज्ञासिष्ट?' इति। 'व्यज्ञासिष्मे'ति होचुः। 'दत्तेति न आत्थे'ति। 'ओमिति' होवाच 'व्यज्ञासिष्टे'ति।

अथ हैनमसुरा ऊचुः—'ब्रवीतु नो भवानि'ति। तेभ्यो-हैतदक्षरमुवाच 'द' इति। 'व्यज्ञासिष्टा?' इति। 'व्यज्ञासिष्मे'ति होचुः। 'दयध्वमिति न आत्थे'ति। 'ओमि'ति होवाच 'व्यज्ञासिष्टे'ति।

तदेतदेवैषा दैवी वागनुवदति स्तनयित्नुः—'द द द' इति। 'दाम्यत दत्त दयध्व'मिति। तदेतत्त्रयं शिक्षेद्दमं दानं दयामिति।

—बृहदारण्यकोपनिषदि पञ्चमेऽध्याये द्वितीयब्राह्मणे।

१२. एका श्लोकव्याख्या।

[संस्कृतभाषायां विशिष्टा टीकाशैली—खण्डान्वयरूपा।]

श्लोकः—

वेदानुद्धरते जगन्निवहते भूगोलमुद्बिभ्रते,
दैत्यं दारयते बलिं छलयते क्षत्रक्षयं कुर्वते।
पौलस्त्यं जयते हलं कलयते कारुण्यमातन्वते,
म्लेच्छान्मूर्च्छयते दशाकृतिकृते कृष्णाय तुभ्यं नमः ॥१॥
(गीतगोविन्दे।)

टीका—

पूर्वमंशावतारान्स्तुत्वा सम्प्रति दशावतारिणं कृष्णं स्तौति 'वेदानिति'। कृष्णाय—परिपूर्णस्वरूपिणे—श्रीकृष्णरूपधारिणे तुभ्यं नमः।...ननु मीनाद्यवतारवानीश्वरः, तस्य स्तुतिः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कृता चेद्, इदानीं गोपालं मां कथं स्तौषि ? इत्यत आह—'दशाकृतिकृते' इति। मीनादिदशरूपधारिणे तुभ्यं नमः। तथा च तत्तदवतारवानीश्वरस्त्वमेव, न त्वदन्य इत्यर्थः। .....ननु ईश्वरश्चेदहं तदाऽनित्यमीनाद्याकृतयः किमिति मया धृताः ? इत्याशङ्क्य अवताराणां प्रयोजनमाह—'वेदानुद्धरते' इति। वेदानुद्धरते—मीनरूपेण वेदोद्धारं कुर्वते। पुनः कीदृशाय ? जगत्—भुवनं, निवहते—कच्छपरूपेण धारयते। पुनः ? भूगोलम्—भूमण्डलम्, उद्विभ्रते—धारयते—वराहरूपेणोर्ध्वं प्रापयते। पुनः कीदृशाय ? दैत्यं—हिरण्यकशिपुं, नरसिंहरूपेण दारयते—विदारयते। पुनः किंभूताय ? बलिं—दैत्यम्, छलयते—वामनरूपेण वञ्चयते। पुनः कीदृशाय ? क्षत्रक्षयं कुर्वते। परशुरामरूपेण दुर्वृत्तक्षत्रियाणां नाशं कुर्वते। पुनः कीदृशाय ? पौलस्त्यं—रावणम्, जयते श्रीरामचन्द्ररूपेण जयते। पुनः कीदृशाय ? हलं कलयते—दुष्टनिग्रहायायुधत्वेन बलभद्ररूपेण कलयते। कारुण्यं—कृपाम्, आतन्वते—बुद्धरूपेण विस्तारयते। म्लेच्छान् कल्किरूपेण मूर्च्छयते—नाशयते।

इति महामहोपाध्यायश्रीशङ्करमिश्रनिर्मिता, गीतगोविन्दमहाकाव्यान्तर्गतप्रथमाऽष्टपद्या अन्तिमश्लोकस्य रसमञ्जरीव्याख्या।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पद्यविभागः।

१३. रामादिपरिणयः।

यस्मिंस्तु दिवसे राजा चक्रे गोदानमुत्तमम् ।
तस्मिंस्तु दिवसे शूरो युधाजित्समुपेयिवान् ॥ १ ॥

पुत्रः केकयराजस्य साक्षाद् भरतमातुलः ।
दृष्ट्वा पृष्ट्वा च कुशलं राजानमिदमब्रवीत् ॥ २ ॥

केकयाधिपती राजा स्नेहात्कुशलमब्रवीत् ।
येषां कुशलकामोऽसि तेषां सम्प्रत्यनामयम् ॥ ३ ॥

स्वस्रीयं मम राजेन्द्र! द्रष्टुकामो महीपते ।
तदर्थमुपयातोऽहमयोध्यां रघुनन्दन ॥ ४ ॥

श्रुत्वा त्वहमयोध्यायां विवाहार्थं तवात्मजान् ।
मिथिलामुपयातांस्तु त्वया सह महीपते ।
त्वरयाऽभ्युपयातोऽहं द्रष्टुकामः स्वसुः सुतम् ॥ ५ ॥

अथ राजा दशरथः प्रियातिथिमुपस्थितम् ।
दृष्ट्वा परमसत्कारैः पूजनार्हमपूजयत् ॥ ६ ॥

ततस्तामुषितो रात्रिं सह पुत्रैर्महात्मभिः ।
प्रभाते पुनरुत्थाय कृत्वा कर्माणि कर्मवित् ।
ऋषींस्तदा पुरस्कृत्य यज्ञवाटमुपागमत् ॥ ७ ॥

युक्ते मुहूर्ते विजये सर्वाभरणभूषितैः ।
भ्रातृभिः सहितो रामः कृतकौतुकमङ्गलः ।
वसिष्ठं पुरतः कृत्वा महर्षीनपरानपि ॥ ८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वसिष्ठो भगवानेत्य वैदेहमिदमब्रवीत् ॥ ९ ॥

राजा दशरथो राजन् कृतकौतुकमङ्गलैः ।
पुत्रैर्नरवरश्रेष्ठ दातारमभिकाङ्क्षति ॥ १० ॥

दातृप्रतिग्रहीतृभ्यां सर्वार्थाः प्रभवन्ति हि ।
स्वधर्मं प्रतिपद्यस्व कृत्वा वैवाह्यमुत्तमम् ॥ ११ ॥

इत्युक्तः परमोदारो वसिष्ठेन महात्मना ।
प्रत्युवाच महातेजा वाक्यं परमधर्मवित् ॥ १२ ॥

कः स्थितः प्रतिहारो मे कस्याज्ञा सम्प्रतीक्ष्यते ।
स्वगृहे को विचारोऽस्ति यथा राज्यमिदं तव ॥ १३ ॥

कृतकौतुकसर्वस्वा वेदिमूलमुपागताः ।
मम कन्या मुनिश्रेष्ठ दीप्ता वह्नेरिवार्चिषः ॥ १४ ॥

सज्जोऽहं त्वत्प्रतीक्षोऽस्मि वेद्यामस्यां प्रतिष्ठितः ।
अविघ्नं कुरुतां राजा किमर्थमवलम्बते ॥ १५ ॥

तद्वाक्यं जनकेनोक्तं श्रुत्वा दशरथस्तदा ।
प्रवेशयामास सुतान्सर्वानृषिगणानपि ॥ १६ ॥

[ततो राजा विदेहानां वसिष्ठमिदमब्रवीत् ।
कारयस्व ऋषे सर्वामृषिभिः सह धार्मिकैः ।
रामस्य लोकरामस्य क्रियां वैवाहिकीं प्रभो ॥ १७ ॥

तथेत्युक्त्वा तु जनकं वसिष्ठो भगवानृषिः ।
विश्वामित्रं पुरस्कृत्य शतानन्दं च धार्मिकम् ॥ १८ ॥

प्रपामध्ये तु विधिवद् वेदिं कृत्वा महातपाः ।
अलंचकार तां वेदिं गन्धपुष्पैः समन्ततः ॥ १९ ॥

सुवर्णपालिकाभिश्चाच्छिद्रकुम्भैश्च साङ्कुरैः ॥ २० ॥
अङ्कुराढ्यैः शरावैश्च धूपपात्रैः सधूपकैः ।
शङ्खपात्रैः स्रुवैः स्रुग्भिः पात्रैरर्घ्याभिपूरितैः ॥ २१ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लाजपूर्णैश्च पात्रौघैरक्षतैरपि संस्कृतैः ।
दर्भैः समैः समास्तीर्यं विधिवन्मन्त्रपूर्वकम् ॥ २२ ॥

अग्निमाधाय वेद्यां तु विधिमन्त्रपुरस्कृतम् ।
जुहावाग्नौ महातेजा वसिष्ठो भगवानृषिः ॥ २३ ॥

ततः सीतां समानीय सर्वाभरणभूषिताम् ।
समक्षमग्नेः संस्थाप्य राघवाभिमुखीं तदा ॥ २४ ॥]

अब्रवीज्जनको राजा कौसल्यानन्दवर्धनम् ॥ २५ ॥

इयं सीता मम सुता सहधर्मचरी तव ।
प्रतीच्छ चैनां भद्रं ते पाणिं गृह्णीष्व पाणिना ॥ २६ ॥

[पतिव्रता महाभागा च्छायेवानुगता सदा ।
इत्युक्त्वा प्राक्षिपद्राजा मन्त्रपूतं जलं तदा ॥ २७ ॥

साधु साध्विति देवानामृषीणां वदतां तदा ।
देवदुन्दुभिनिर्घोषः पुष्पवर्षो महानभूत् ॥ २८ ॥

एवं दत्वा तदा सीतां मन्त्रोदकपुरस्कृताम् ।
अब्रवीज्जनको राजा हर्षेणाभिपरिप्लुतः ॥ २९ ॥]

लक्ष्मणागच्छ, भद्रं, ते ऊर्मिलां च ममात्मजाम् ।
प्रतीच्छ पाणिं गृह्णीष्व मा भूत्कालस्य पर्ययः ॥ ३० ॥

तमेवमुक्त्वा जनको भरतं चाभ्यभाषत ।
पाणिं गृह्णीष्व माण्डव्याः पाणिना रघुनन्दन ॥ ३१ ॥

शत्रुघ्नं चापि धर्मात्मा अब्रवीज्जनकेश्वरः ।
श्रुतकीर्त्या महाबाहो पाणिं गृह्णीष्व पाणिना ॥ ३२ ॥

सर्वे भवन्तः सौम्याश्च सर्वे सुचरितव्रताः ।
पत्नीभिः सन्तु काकुत्स्था मा भूत्कालस्य पर्ययः ॥ ३३ ॥

जनकस्य वचः श्रुत्वा पाणीन्पाणिभिरस्पृशन् ।
चत्वारस्ते चतसृणां वसिष्ठस्य मते स्थिताः ॥ ३४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अग्निं प्रदक्षिणं कृत्वा वेदिं राजानमेव च ।
ऋषींश्चैव महात्मानः सभार्या रघुसत्तमाः ।
यथोक्तेन तदा चक्रुर्विवाहं विधिपूर्वकम् ॥ ३५ ॥

काकुत्स्थैश्च गृहीतेषु ललितेषु च पाणिषु ।
पुष्पवृष्टिर्महत्यासीदन्तरिक्षात्सुभास्वरा ॥ ३६ ॥

दिव्यदुन्दुभिनिर्घोषैर्गीतवादित्रनिःस्वनैः ।
ननृतुश्चाप्सरःसंघा गन्धर्वाश्च जगुः कलम् ।
विवाहे रघुमुख्याणां तदद्भुतमदृश्यत ॥ ३७ ॥

ईदृशे वर्तमाने तु तूर्योद्घुष्टनिनादिते ।
त्रिरग्निं ते परिक्रम्य ऊहुर्भार्या रघूत्तमाः ॥ ३८ ॥

अथोपकार्यां जग्मुस्ते सदारा रघुनन्दनाः ।
राजाऽप्यनुययौ पश्यन्सर्षिसङ्घः सबान्धवः ॥ ३९ ॥

— रामायणे बालकाण्डे त्रिसप्ततितमः सर्गः ।

१४. दमयन्तीस्वयंवरः ।

बृहद्रथ उवाच ।

अथ काले शुभे प्राप्ते तिथौ पुण्ये क्षणे तथा ।
आजुहाव महीपालान्भीमो राजा स्वयंवरे ॥ १ ॥

तच्छ्रुत्वा पृथिवीपालाः सर्वे हृच्छयपीडिताः ।
त्वरिताः समुपाजग्मुर्दमयन्तीमभीप्सवः ॥ २ ॥

कनकस्तम्भरुचिरं तोरणेन विराजितम् ।
विविशुस्ते नृपा रङ्गं महासिंहा इवाचलम् ॥ ३ ॥

तत्रासनेषु विविधेष्वासीनाः पृथिवीक्षितः ।
सुरभिस्रग्धराः सर्वे प्रमृष्टमणिकुण्डलाः ॥ ४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तां राजसमितिं पूर्णां नागैर्भोगवतीमिव ।
सम्पूर्णां पुरुषव्याघ्रैर्व्याघ्रैर्गिरिगुहामिव ।
प्रविवेश नलो देवैः पुण्यश्लोको नराधिपः ॥ ५ ॥

तत्र स्म पीना दृश्यन्ते बाहवः परिघोपमाः ।
आकारवर्णसुश्लक्ष्णाः पञ्चशीर्षा इवोरगाः ॥ ६ ॥
सुकेशान्तानि चारूणि सुनासानि शुभानि च ।
मुखानि राज्ञां शोभन्ते नक्षत्राणि यथा दिवि ॥ ७ ॥
दमयन्ती ततो रङ्गं प्रविवेश शुभानना ।
मुष्णती प्रभया राज्ञां चक्षूंषि च मनांसि च ॥ ८ ॥

तस्या गात्रेषु पतिता तेषां दृष्टिर्महात्मनाम् ।
तत्र तत्रैव सक्ताऽभून्न चचाल च पश्यताम् ॥ ९ ॥
ततः संकीर्त्यमानेषु राज्ञां नामसु भारत ।
ददर्श भैमी पुरुषान्पञ्च तुल्याकृतीनिह ॥ १० ॥

तान्समीक्ष्य ततः सर्वान्निर्विशेषाकृतीन्स्थिता ।
सन्देहादथ वैदर्भी नाभ्यजानान्नलं नृपम् ॥ ११ ॥
यं यं हि ददृशे तेषां तं तं मेने नलं नृपम् ।
सा चिन्तयन्ती बुद्ध्याऽथ तर्कयामास भामिनी ॥ १२ ॥

कथं नु देवाज्ञानीयां कथं विद्यां नलं नृपम् ।
एवं संचिन्तयन्ती सा वैदर्भी भृशदुःखिता ॥ १३ ॥
श्रुतानि देवलिङ्गानि तर्कयामास भारत ।
देवानां यानि लिङ्गानि स्थविरेभ्यः श्रुतानि मे ।
तानीह तिष्ठतां भूमावेकस्यापि न लक्ष्यते ॥ १४ ॥

एवं विचिन्त्य बहुधा विचार्यं च पुनः पुनः ।
शरणं प्रति देवानां प्राप्तकालममन्यत ॥ १५ ॥

वाचा च मनसा चैव नमस्कारं प्रयुज्य सा ।
देवेभ्यः प्राञ्जलिर्भूत्वा वेपमानेदमब्रवीत् ॥ १६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दमयन्त्युवाच ।

हंसानां वचनं श्रुत्वा यथा मे नैषधो वृतः ।
पतित्वे तेन सत्येन देवास्तं प्रदिशन्तु मे ॥ १७ ॥

मनसा वचसा चैव यथा नातिचराम्यहम् ।
तेन सत्येन विबुधास्तमेव प्रदिशन्तु मे ॥ १८ ॥

यथा देवैः स मे भर्ता विहितो निषधाधिपः ।
तेन सत्येन मे देवास्तमेव प्रदिशन्तु में ॥ १९ ॥

यथेदं व्रतमारब्धं नलस्याराधने मया ।
तेन सत्येन मे देवास्तमेव प्रदिशन्तु मे ॥ २० ॥

स्वं चैव रूपं पुष्यन्तु लोकपाला महेश्वराः ।
यथाहमभिजानीयां पुण्यश्लोकं नराधिपम् ॥ २१ ॥

बृहदश्व उवाच ।

निशम्य दमयन्त्यास्तत्करुणं प्रतिदेवितम् ।
निश्चयं परमं तथ्यमनुरागं च नैषधे ॥ २२ ॥

मनोविशुद्धिं बुद्धिं च भक्तिं रागं च नैषधे ।
यथोक्तं चक्रिरे देवाः सामर्थ्यं लिङ्गधारणे ॥ २३ ॥

साऽपश्यद्विबुधान्सर्वानस्वेदान्स्तब्धलोचनान् ।
अम्लानस्रग्रजोहीनान्स्थितानस्पृशतः क्षितिम् ॥ २४ ॥

छायाद्वितीयो म्लानस्रग्रजःस्वेदसमन्वितः ।
भूमिष्ठो नैषधश्चैव निमिषेण च सूचितः ॥ २५ ॥

सा समीक्ष्य तु तान्देवान्पुण्यश्लोकं च भारत ।
नैषधं वरयामास भैमी धर्मेण पाण्डव ॥ २६ ॥

विलज्जमाना वस्त्रान्ते जग्राहायतलोचना ।
स्कन्धदेशेऽसृजत्तस्य स्रजं परमशोभनाम् ॥ २७ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वरयामास चवैनं पतित्वे वरवर्णिनी।
ततो हाहेति सहसा मुक्तः शब्दो नराधिपैः॥ २८॥
देवैर्महर्षिभिस्तत्र साधु साध्विति भारत।
विस्मितैरीरितः शब्दः प्रशंसद्भिर्नलं नृपम्॥ २९॥
दमयन्तीं तु कौरव्य वीरसेनसुतो नृपः।
आश्वासयद् वरारोहां प्रहृष्टेनान्तरात्मना॥ ३०॥

नल उवाच।

यस्त्वं भजसि कल्याणि! पुमांसं देवसन्निधौ।
तस्मान्मां विद्धि भर्तारमेतत्ते वचने रतम्॥ ३१॥
यावच्च मे धरिष्यन्ति प्राणा देहे शुचिस्मिते।
तावत्त्वयि भविष्यामि सत्यमेतद् ब्रवीमि ते॥ ३२॥

बृहद्रथ उवाच।

दमयन्तीं तथा वाग्भिरभिनन्द्य कृताञ्जलिः।
तौ परस्परतः प्रीतौ दृष्ट्वा त्वग्निपुरोगमान्
तानेव शरणं देवाञ्जग्मतुर्मनसा तदा॥ ३३॥
वृते तु नैषधे भैम्या लोकपाला महौजसः।
प्रहृष्टमनसः सर्वे नलायाष्ट वरान्ददुः॥ ३४॥
प्रत्यक्षदर्शनं यज्ञे गतिं चानुत्तमां शुभाम्।
नैषधाय ददौ शक्रः प्रीयमाणः शचीपतिः॥ ३५॥
अग्निरात्मभवं प्रादाद्यत्र वाञ्छति नैषधः।
लोकानात्मप्रभांश्चैव ददौ तस्मै हुताशनः॥ ३६॥
यमस्त्वन्नरसं प्रादाद् धर्मे च परमां स्थितिम्।
अपांपतिरपां भावं यत्र वाञ्छति नैषधः॥ ३७॥
स्रजश्चोत्तमगन्धाढ्याः सद्य च मिथुनं ददुः।
वरानेवं प्रदायास्य देवास्ते त्रिदिवं गताः॥ ३८॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एतत्सर्वं नलोऽपश्यद् दमयन्ती च भारत ।
यथा स्वप्नं महाराज ! तथैव ददृशुर्जनाः ॥ ३९ ॥
ततः स्वयंवरं चक्रे भीमो राजाऽतिमानुषम् ।
समागतेषु सर्वेषु भूपालेषु विशांपते ॥ ४० ॥
दमयन्त्यपिं तद् दृष्ट्वा राजमण्डलमृद्धिमत् ।
अन्वीक्ष्य नैषधं वव्रे भैमी धर्मेण भारत ॥ ४१ ॥
वृते च नैषधे भैम्या निर्वृते च स्वयंवरे ।
सर्वे एव महीपालाः प्रतिजग्मुर्यथागतम् ॥ ४२ ॥
गतेषु पार्थिवेन्द्रेषु भीमः प्रीतो महामनाः ।
विवाहं कारयामास दमयन्त्या नलस्य च ॥ ४३ ॥
न्युष्य तत्र यथाकामं नैषधो द्विपदांवरः ।
भीमेन समनुज्ञातो जगाम नगरं स्वकम् ॥ ४४ ॥
अवाप्य नारीरत्नं तु पुण्यश्लोकोऽपि पार्थिवः ।
रेमे सह तया राजञ्छच्येव बलवृत्रहा ॥ ४५ ॥
अतीव मुदितो राजा भ्राजमानोऽशुमानिव ।
अरञ्जयत्प्रजा वीरो धर्मेण परिपालयन् ॥ ४६ ॥
ईजे चाप्यश्वमेधेन ययातिरिव नाहुषः ।
अन्यैश्च बहुभिर्धीमान्क्रतुभिश्चाप्तदक्षिणैः ॥ ४७ ॥
पुनश्च रमणीयेषु वनेषूपवनेषु च ।
दमयन्त्या सह नलो विजहारामरोपमः ॥ ४८ ॥

— महाभारते वनपर्वणि नलोपाख्याने ।

१५. प्रावृट्शरद्वर्णनम् ।

ततः प्रावर्तत प्रावृट् सर्वसत्त्वसमुद्भवा ।
विद्योतमानपरिधिर्विस्फूर्जितनभस्तला ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सान्द्रनीलाम्बुदैर्व्योम सविद्युत्स्तनयित्नुभिः ।
अस्पष्टं ज्योतिराच्छन्नं ब्रह्मेव सगुणं बभौ ॥ २॥
अष्टौ मासान्निपीतं यद् भूम्याश्चोदमयं वसु ।
स्वगोभिर्भोक्तुमारेभे पर्जन्यः काल आगते ॥ ३॥
तडित्वन्तो महामेघाश्चण्डश्वसनवेपिताः ।
प्रीणनं जीवनं ह्यस्य मुमुचुः करुणा इव ॥ ४॥
निशामुखेषु खद्योतास्तमसा भान्ति, न ग्रहाः ।
यथा पापेन पाषण्डा न हि वेदाः कलौ युगे ॥ ५॥ ८।१०।४३॥
श्रुत्वा पर्जन्यनिनदं मण्डूका व्यसृजन्गिरः । टि।+२८।
तूष्णीं शयानाः प्राग्यद्वद् ब्राह्मणा नियमात्यये ॥ ६॥ ट्रस्ना.८भू. ३।.
>।।.५.७।.व.
क्षेत्राणि सस्यसम्पद्भिः कर्षकाणां मुदं ददुः ।
धनिनामुपतापं च दैवाधीनमजानताम् ॥ ७॥
जलस्थलौकसः सर्वे नववारिनिषेवया ।
बभ्रुःसुरुचिरं रूपं यथा हरिनिषेवया ॥ ८॥
गिरयो वर्षधाराभिर्हन्यमाना न विव्यथुः ।
अभिभूयमाना व्यसनैर्यथाऽधोक्षजचेतसः ॥ ९॥
मार्गा बभूवुः सन्दिग्धास्तृणैश्छन्ना ह्यसंस्कृताः ।
नाभ्यस्यमानाः श्रुतयो द्विजैः कालहता इव ॥ १०॥
धनुर्वियति माहेन्द्रं निर्गुणं च गुणिन्यभात् ।
व्यक्ते गुणव्यतिकरेऽगुणवान्पुरुषो यथा ॥ ११॥
मेघागमोत्सवा हृष्टाः प्रत्यनन्दञ्छिखण्डिनः ।
गृहेषु तप्ता निर्विण्णा यथाऽच्युतजनागमे ॥ १२॥
सरस्स्वशान्तरोधस्सु न्यूषुरङ्गापि सारसाः ।
गृहेष्वशान्तकृत्येषु ग्राम्या इव दुराशयाः ॥ १३॥
जलौघैर्निरभिद्यन्त सेतवो वर्षतीश्वरे ।
पाषण्डिनामसद्वादैर्वेदमार्गा यथा कलौ ॥ १४॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

व्यमुञ्चन्वायुभिर्नुन्ना भूतेभ्योऽथामृतं घनाः ।
यथाशिषो विश्पतयः काले काले द्विजेरिताः ॥ १५ ॥
एवं वनं तद्वर्षिष्ठं पक्वखर्जूरजम्बुमत् ।
गोगोपालैर्वृतो रन्तुं सबलः प्राविशद्धरिः ॥ १६ ॥
धेनवो मन्दगामिन्य ऊधोभारेण भूयसा ।
ययुर्भगवताऽऽहूता द्रुतं प्रीत्या स्नुतस्तनाः ॥ १७ ॥
क्वचिद्वनस्पतिक्रोडे गुहायां चाभिवर्षति ।
निर्विश्य भगवान्रेमे कन्दमूलफलाशनः ॥ १८ ॥
दध्योदनं समानीतं शिलायां सलिलान्तिके ।
संभोजनीयैर्बुभुजे गोपैः संकर्षणान्वितः ॥ १९ ॥
शाद्वलोपरि संविश्य चर्वतो मीलितेक्षणान् ।
तृप्तान्वृषान्वत्सतरान्गाश्च स्वोधोभरश्रमाः ॥ २० ॥
प्रावृट्श्रियं च तां वीक्ष्य सर्वभूतमुदावहाम् ।
भगवान्पूजयांचक्रे आत्मशक्त्युपबृंहिताम् ॥ २१ ॥
एवं निवसतोस्तस्मिन्नामकेशवयोर्व्रजे ।
शरत्समभवद् व्यभ्रा स्वच्छाम्बुपरुषानिला ॥ २२ ॥
शरदा नीरजोत्पत्त्या नीराणि प्रकृतिं ययुः ।
भ्रष्टानामिव चेतांसि पुनर्योगनिषेवया ॥ २३ ॥
व्योम्नोऽब्दं भूतशाबल्यं भुवः पङ्कमपां मलम् ।
शरज्जहाराश्रमिणां कृष्णे भक्तिर्यथाऽशुभम् ॥ २४ ॥
सर्वस्वं जलदा हित्वा विरेजुः शुभ्रवर्चसः ।
यथा त्यक्तैषणाः शान्ता मुनयो मुक्तकिल्बिषाः ॥ २५ ॥
गिरयो मुमुचुस्तोयं क्वचिन्न मुमुचुः शिवम् ।
यथा ज्ञानामृतं काले ज्ञानिनो ददते न वा ॥ २६ ॥
नैवाविदुःक्षीयमाणं जलं क्षुद्रजलेचराः ।
यथायुरन्वहं क्षय्यं नरा मूढाः कुटुम्बिनः ॥ २७ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गाधवारिचरास्तापमविन्दञ्छरदर्कजम् ।
यथा दरिद्रः कृपणः कुटुम्ब्यविजितेन्द्रियः ॥ २८ ॥

शनैः शनैर्जहुः पङ्कं स्थलान्यामं च वीरुधः ।
यथाहम्ममतां धीराः शरीरादिष्वनात्मसु ॥ २९ ॥

निश्चलाम्बुरभूत्तूष्णीं समुद्रः शरदागमे ।
आत्मन्युपरते सम्यङ् मुनिर्व्युपरतागमः ॥ ३० ॥

केदारेभ्यस्त्वपोऽगृह्णन्कर्षका दृढसेतुभिः ।
यथा प्राणैः स्रवज्ज्ञानं तन्निरोधेन योगिनः ॥ ३१ ॥

शरदर्कांशुजांस्तापान्भूतानामुडुपोऽहरत् ।
देहाभिमानजं बोधं मुकुन्दो व्रजयोषिताम् ॥ ३२ ॥

खमशोभत निर्मेघं शरद्विमलतारकम् ।
तत्त्वयुक्तं यथा चित्तं परमात्मार्थदर्शनम् ॥ ३३ ॥

अखण्डमण्डलो व्योम्नि रराजोडुगणैः शशी ।
यथा यदुपतिः कृष्णो वृष्णिचक्रावृतो भुवि ॥ ३४ ॥

आश्लिष्य समशीतोष्णं प्रस्खनवनमारुतम् ।
जनास्तापं जहुः सम्यक् कृष्णप्रेमपरिप्लुताः ॥ ३५ ॥

उदहृष्यन्वारिजानि सूर्योत्थाने कुमुद्विना ।
राज्ञा तु निर्भया लोका यथा दस्यून्विना नृप ॥३६॥

पुरग्रामेष्वाग्रयणैरैन्द्रियैश्च महोत्सवैः ।
बभौ भूः पक्वसस्याढ्या कलाभ्यां नितरां हरेः ॥३७॥

वणिङ्मुनिनृपस्नाता निर्गम्यार्थान्प्रपेदिरे ।
वर्षरुद्धा यथा सिद्धाः स्वपिण्डान्काल आगते ॥ ३८ ॥

— श्रीमद्भागवते दशमस्कन्धे विंशोऽध्याये ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

१६. रतिविलापः ।

अथ मोहपरायणा सती विवशा कामवधूर्विबोधिता ।
विधिना प्रतिपादयिष्यता नववैधव्यमसह्यवेदनम् ॥१॥

अवधानपरे चकार सा प्रलयान्तोन्मिषिते विलोचने ।
न विवेद तयोरतृप्तयोः प्रियमत्यन्तविलुप्तदर्शनम् ॥ २ ॥

अयि जीवितनाथ जीवसीत्यभिधायोत्थितया तया पुरः ।
ददृशे पुरुषाकृति क्षितौ हरकोपानलभस्म केवलम् ॥ ३ ॥

अथ सा पुनरेव विह्वला वसुधालिङ्गनधूसरस्तनी ।
विललाप विकीर्णमूर्धजा समदुःखामिव कुर्वती स्थलीम् ॥४॥

क्व नु मां त्वदधीनजीवितां विनिकीर्य क्षणभिन्नसौहृदः ।
नलिनीं क्षतसेतुबन्धने जलसङ्घात इवासि विद्रुतः ॥ ५ ॥

कृतवानसि विप्रियं न मे प्रतिकूलं न च ते मया कृतम् ।
किमकारणमेव दर्शनं विलपन्त्यै रतये न दीयते ॥ ६ ॥

मदनेन विनाकृता रतिः क्षणमात्रं किल जीवितेति मे ।
वचनीयमिदं व्यवस्थितं रमण त्वामनुयामि यद्यपि ॥ ७ ॥

क्रियतां कथमन्त्यमण्डनं परलोकान्तरितस्य ते मया ।
सममेव गतोऽस्यतर्कितां गतिमङ्गेन च जीवितेन च ॥ ८ ॥

ऋजुतां नयतः स्मरामि ते शरमुत्सङ्गनिषण्णधन्वनः ।
मधुना सह सस्मितां कथां नयनोपान्तविलोकितं च तत् ॥९॥

क्व नु ते हृदयंगमः सखा कुसुमायोजितकार्मुको मधुः ।
न खलूग्ररुषा पिनाकिना गमितः सोऽपि सुहृद्गतां गतिम् ॥१०॥

अथ तैः परिदेवितार्थैर्हृदये दिग्धशरैरिवाहतः ।
रतिमभ्युपपत्तुमातुरां मधुरात्मानमदर्शयत्पुरः ॥ ११ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तमवेक्ष्य रुरोद सा भृशं स्तनसम्बाधमुरो जघान च।
स्वजनस्य हि दुःखमग्रतो विवृतद्वारमिवोपजायते ॥१२॥

अयि सम्प्रति देहि दर्शनं स्मर! पर्युत्सुक एष माधवः।
दयितास्वनवस्थितं नृणां न खलु प्रेम चलं सुहृज्जने ॥१३॥

गत एव न ते निवर्तते स सखा दीप इवानिलाहतः।
अहमस्य दशेव पश्य मामविषह्यव्यसनेन धूमिताम् ॥१४॥

विधिना कृतमर्धवैशसं ननु मां कामवधे विमुञ्चता।
अनपायिनि संश्रयद्रुमे गजभग्ने पतनाय वल्लरी ॥ १५॥

तदिदं क्रियतामनन्तरं भवता बन्धुजनप्रयोजनम्।
विधुरां ज्वलनातिसर्जनान्ननु मां प्रापय पत्युरन्तिकम् ॥१६॥

शशिना सह याति कौमुदी सह मेघेन तडित्प्रलीयते।
प्रमदाः पतिवर्त्मगा इति प्रतिपन्नं हि विचेतनैरपि ॥१७॥

कुसुमास्तरणे सहायतां बहुशः सौम्य यतस्त्वमावयोः।
कुरु संप्रति तावदाशु मे प्रणिपाताञ्जलियाचितश्चिताम् ॥१८॥

तदनु ज्वलनं प्रदीपितं त्वरयेर्दक्षिणवातवीजनैः।
विदितं खलु ते यथा स्मरः क्षणमप्युत्सहते न मां विना ॥१९॥

इति चापि विधाय दीयतां सलिलस्याञ्जलिरेक एव नौ।
अविभज्य परत्र तं मया सहितः पास्यति ते स बान्धवः ॥२०॥

— कुमारसम्भवे चतुर्थे सर्गे।

१७. महाभिनिष्क्रमणम्।

स तथा विषयैर्विलोभ्यमानः परमार्हैरपि शाक्यराजसूनुः।
न जगाम धृतिं न शर्म लेभे हृदये सिंह इवातिदिग्धविद्धः ॥१॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

अधिगम्य ततो विवेकजं तु परमप्रीतिसुखं मनःसमाधिम् ।
इदमेव ततः परं प्रदध्यौ मनसा लोकगतिं निशम्य सम्यक् ॥२॥
कृपणं बत यज्जनः स्वयं सन्नवशो व्याधिजराविनाशधर्मा ।
जरयार्दितमातुरं मृतं वा परमज्ञो विजुगुप्सते मदान्धः ॥ ३ ॥
इति तस्य विपश्यतो यथावज्जगतो व्याधिजराविपत्तिदोषान् ।
बलयौवनजीवितप्रवृत्तौ विजगामात्मगतो मदः क्षणेन ॥ ४ ॥
तुरगावचरं स घोषयित्वा जविनं छन्दकनामधेयमाह ।
हयमानय कन्थकं त्वरावानमृतं प्राप्तुमितोऽद्य मे यियासा ॥५॥
हृदि या मम तुष्टिरद्य जाता व्यवसायश्च यथा मतौ निविष्टः ।
विजनेऽपि च नाथवानिवास्मि ध्रुवमर्थोऽभिमुखःसमेत इष्टः॥६॥
प्रतिगृह्य ततः स भर्तुराज्ञां विदितार्थोऽपि नरेन्द्रशासनस्य ।
मनसीव परेण नोद्यमानस्तुरगस्यानयने मतिं चकार ॥ ७ ॥
अथ हेमखलीनपूर्णवक्त्रं लघुशय्यास्तरणोपगूढपृष्ठम् ।
बलसत्त्वजवत्वरोपपन्नं स वराश्वं समुपानिनाय भर्त्रे ॥ ८ ॥
प्रततत्रिकपुच्छमूलपार्ष्णिं निभृतं ह्रस्वतनूजपुच्छकर्णम् ।
विनतोन्नतपृष्ठकुक्षिपार्श्वं विपुलप्रोथललाटकट्ठुरस्कम् ॥ ९ ॥
उपगुह्य स तं विशालवक्षाः कमलाभेन च सान्त्वयन्करेण ।
मधुराक्षरया गिरा शशास ध्वजिनीमध्यमिव प्रवेष्टुकामः ॥१०॥
बहुशः कलिशत्रवो निरस्ताः समरे त्वामधिरुह्य पार्थिवेन ।
अहमप्यमृतं परं यथावत्तुरगश्रेष्ठ लभेय तत्कुरुष्व ॥ ११ ॥
सुलभाः खलु संयुगे सहाया विषयावाप्तसुखे धनार्जने वा ।
पुरुषस्य तु दुर्लभाः सहायाः पतितस्यापदि धर्मसंश्रये वा ॥१२॥
तदिदं परिगम्य धर्मयुक्तं मम निर्याणमनो जगद्धिताय ।
तुरगोत्तम वेगविक्रमाभ्यां प्रयतस्वात्महिते जगद्धिते च ॥१३॥
इति सुहृदमिवानुशिष्य कृत्ये तुरगवरं नृवरो वनं यियासुः ।
सितमसितगतिद्युतिर्वपुष्मान् रविरिव शारदमभ्रमारुरोह ॥१४॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ स परिहरन्निशीथचण्डं परिजनबोधकरं ध्वनिं सदश्वः।
विगतहनुरवः प्रशान्तहेषश्चकितविमुक्तपदक्रमो जगाम ॥१५॥

कनकवलयभूषितप्रकोष्ठैः कमलनिभैः कमलानि च प्रविध्य।
अवनततनवस्ततोऽस्य यक्षाश्चकितगतेर्दधिरे खुरान्कराग्रैः ॥१६॥

गुरुपरिघकपाटसंवृता या न सुखमपि छिद्रैरपावियन्ते।
व्रजति नृपसुते गतस्वनास्ताः स्वयमभवन् विवृताः पुरः प्रतोल्यः॥१७॥

पितरमभिमुखं सुतं च बालं जनमनुरक्तमनुत्तमां च लक्ष्मीम्।
कृतमतिरपहाय निर्व्यपेक्षः पितृनगरात्स ततो विनिर्जगाम ॥१८॥

अथ स विकचपङ्कजायताक्षः पुरमवलोक्य ननाद सिंहनादम्।
जननमरणयोरदृष्टपारो न पुनरहं कपिलाह्वयं प्रवेष्टा ॥१९॥

इति वचनमिदं निशम्य तस्य द्रविणपतेः परिषद्गणा ननन्दुः।
प्रमुदितमनसश्च देवसंघा व्यवसितपारणमाशशंसिरेऽस्मै ॥२०॥

हुतवहवपुषो दिवौकसोऽन्ये व्यवसितमस्य सुदुष्करं विदित्वा।
अकृषत तुहिने पथि प्रकाशं वनविवरप्रसृता इवेन्दुपादाः ॥२१॥

हरितुरगतुरंगवक्त्ररङ्गः स तु विचरन्मनसीव नोद्यमानः।
अरुणपरुषभारमन्तरिक्षं सरसबहूनि जगाम योजनानि ॥२२॥

—बुद्धचरिते पञ्चमे सर्गे।

१८. दशावतारलीला।

[मालगौडरागेण रूपकतालेन गीयते।]

प्रलयपयोधिजले धृतवानसि वेदम्,
विहितवहित्रचरित्रमखेदम्।
केशव धृतमीनशरीर,
जय जगदीश हरे ॥१॥ ध्रुवपदम्॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

क्षितिरतिविपुलतरे तव तिष्ठति पृष्ठे,
धरणिधरणकिणचक्रगरिष्ठे ।
केशव धृतकच्छपरूप,
जय जगदीश हरे ॥ २ ॥

वसति दशनशिखरे धरणी तव लग्ना,
शशिनि कलङ्ककलेव निमग्ना ।
केशव धृतशूकररूप,
जय जगदीश हरे ॥ ३ ॥

तव करकमलवरे नखमद्भुतशृङ्गम्,
दलितहिरण्यकशिपुतनुभृङ्गम् ।
केशव धृतनरहरिरूप,
जय जगदीश हरे ॥ ४ ॥

छलयसि विक्रमणे बलिमद्भुतवामन,
पदनखनीरजनितजनपावन ।
केशव धृतवामनरूप,
जय जगदीश हरे ॥ ५ ॥

क्षत्रियरुधिरमये जगदपगतपापम्,
स्नपयसि पयसि शमितभवतापम् ।
केशव धृतभृगुपतिरूप,
जय जगदीश हरे ॥ ६ ॥

वितरसि दिक्षु रणे दिक्पतिकमनीयम्,
दशमुखमौलिबलिं रमणीयम् ।
केशव धृतरामशरीर,
जय जगदीश हरे ॥ ७ ॥

वहसि वपुषि विशदे वसनं जलदाभम्,
हलहतिभीतिमिलितयमुनाभम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

केशव धृतहलधररूप,
जय जगदीश हरे ॥८॥

निन्दसि यज्ञविधेरहह श्रुतिजातम्,
सदयहृदय दर्शितपशुघातम् ।
केशव धृतबुद्धशरीर,
जय जगदीश हरे ॥९॥

म्लेच्छनिवहनिधने कलयसि करवालम्,
धूमकेतुमिव किमपि करालम् ।
केशव धृतकल्किशरीर,
जय जगदीश हरे ॥१०॥

श्रीजयदेवकवेरिदमुदितमुदारम्,
शृणु सुखदं शुभदं भवसारम् ।
केशव धृतदशविधरूप,
जय जगदीश हरे ॥११॥

वेदानुद्धरते जगन्निवहते भूगोलमुद्बिभ्रते,
दैत्यं दारयते बलिं छलयते क्षत्रक्षयं कुर्वते ।
पौलस्त्यं जयते हलं कलयते कारुण्यमातन्वते,
म्लेच्छान्मूर्च्छयते दशाकृतिकृते कृष्णाय तुभ्यं नमः ॥१२॥

— गीतगोविन्दकाव्ये प्रथमाऽष्टपदी ।

१९. श्रीरत्नाकरपञ्चविंशिका ।

श्रेयः श्रियां मङ्गलकेलिसद्म, नरेन्द्रदेवेन्द्रनताङ्घ्रिपद्म ।
सर्वज्ञ सर्वातिशयप्रधान चिरञ्जय ज्ञानकलानिधान ॥१॥

जगत्त्रयाधार कृपावतार दुर्वारसंसारविकारवैद्य ।
श्रीवीतराग त्वयि मुग्धभावाद् विज्ञप्रभो विज्ञपयामि किञ्चित्॥२॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

किं बाललीलाकलितो न बालः पित्रोः पुरो जल्पति निर्विकल्पः ।
तथा यथार्थं कथयामि नाथ निजाशयं सानुशयस्तवाग्रे ॥३॥
दत्तं न दानं परिशीलितश्च न शालि शीलं न तपोऽभितप्तम् ।
शुभो न भावोऽप्यभवद् भवेऽस्मिन्विभो मया भ्रान्तमहो मुधैव ॥४॥
दग्धोऽग्निना क्रोधमयेन दष्टो दुष्टेन लोभाख्यमहोरगेण ।
ग्रस्तोऽभिमानाजगरेण मायाजालेन बद्धोऽस्मि कथं भजे त्वाम् ॥५॥

कृतं मयाऽमुत्र हितं न चेह लोकेऽपि लोकेश सुखं न मेऽभूत् ।
अस्मादृशां केवलमेव जन्म जिनेश जज्ञे भवपूरणाय ॥ ६ ॥
मन्ये मनो यत्र मनोज्ञवृत्त त्वदास्यपीयूषमयूखलाभात् ।
द्रुतं महानन्दरसं कठोरमस्मादृशां देव तदश्मतोऽपि ॥ ७ ॥
त्वत्तः सुदुष्प्रापमिदं मयाप्तं रत्नत्रयं भूरिभवभ्रमेण ।
प्रमादनिद्रावशतो गतं तत्कस्याग्रतो नायक! पूत्करोमि ॥८॥

वैराग्यरङ्गः परवञ्चनाय धर्मोपदेशो जनरञ्जनाय ।
वादाय विद्याध्ययनं च मेऽभूत् कियद् ब्रुवे हास्यकरं स्वमीश ॥९॥
परापवादेन मुखं सदोषं नेत्रं परस्त्रीजनवीक्षणेन ।
चेतः परापायविचिन्तनेन कृतं भविष्यामि कथं विभोऽहम् ॥१०॥
विडम्बितं मत्स्मरवस्मरार्तिदशावशात्स्वं विषयान्धलेन ।
प्रकाशितं तद् भवतो ह्रियैव सर्वज्ञ सर्वं स्वयमेव वेत्सि ॥११॥

ध्वस्तोऽन्यमन्त्रैः परमेष्ठिमन्त्रः कुशास्त्रवाक्यैर्निहतागमोक्तिः ।
कर्तुं वृथा कर्म कुदेवसंगादवाञ्छि हे नाथ! मतिभ्रमो मे ॥१२॥

विमुच्य दृग्लक्ष्यगतं भवन्तं ध्याता मया मूढधिया हृदन्तः ।
कटाक्षवक्षोजगभीरनाभिकटीतटीयाः सुदृशां विलासाः ॥१३॥

लोलेक्षणावक्त्रनिरीक्षणेन यो मानसे रागलयो विलग्नः ।
न शुद्धसिद्धान्तपयोधिमध्ये धौतोऽप्यगात् तारक कारणं किम् ॥१४॥

अङ्गं न चङ्गं, न गुणो गुणानां, न निर्मलः कोऽपि कलाविलासः ।
स्फुरत्प्रभा न प्रभुता च काऽपि तथाप्यहंकारकदर्थितोऽहम् ॥१५॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आयुर्गलत्याशु न पापबुद्धिर्गतं वयो नो विषयाभिलाषः।
यत्नश्च भैषज्यविधौ न धर्मे स्वामिन्महामोहविडम्बना मे ॥१६॥

नात्मा न पुण्यं न भवो न पापं मया विटानां कटुगीरपीयम्।
अधारि कर्णे त्वयि केवलार्के परिस्फुटे सत्यपि देव धिङ्माम् ॥१७॥

न देवपूजा न च पात्रपूजा न श्राद्धधर्मश्च न साधुधर्मः।
लब्ध्वाऽपि मानुष्यमिदं समस्तं कृतं मयाऽरण्यविलापतुल्यम्॥१८॥

चक्रे मयाऽसत्स्वपि कामधेनुकल्पद्रुचिन्तामणिषु स्पृहार्तिः।
न जैनधर्मे स्फुटशर्मदेऽपि जिनेश! मे पश्य विमूढभावम् ॥१९॥

सद्भोगलीला न च रोगकीला धनागमो नो निधनागमश्च।
दारा न कारा नरकस्य चित्ते व्यचिन्ति नित्यं मयकाऽधमेन ॥२०॥

स्थितं न साधोर्हृदि साधुवृत्तात्परोपकारान्न यशोऽर्जितं च।
कृतं न तीर्थोद्धरणादिकृत्यं मया मुधा हारितमेव जन्म ॥२१॥

वैराग्यरङ्गो न गुरूदितेषु न दुर्जनानां वचनेषु शान्तिः।
नाध्यात्मलेशो मम कोऽपि देव! तार्यः कथंकारमयं भवाब्धिः॥२२॥

पूर्वे भवेऽकारि मया न पुण्यमागामिजन्मन्यपि नो करिष्ये।
यदीदृशोऽहं मम तेन नष्टा भूतोद्भवद्भाविभवत्रयीश ॥ २३ ॥

किंवा मुधाऽहं बहुधा सुधाभुक्पूज्य त्वदग्रे चरितं स्वकीयम्।
जल्पामि यस्मात् त्रिजगत्स्वरूपनिरूपकस्त्वं कियदेतदत्र ॥२४॥

दीनोद्धारधुरन्धरस्त्वदपरो नास्ते मदन्यः कृपा—
पात्रं नात्र जने जिनेश्वर तथाप्येतां न याचे श्रियम्।
किन्त्वर्हन्निदमेव केवलमहो सद्बोधिरत्नं शिवम्,
श्रीरत्नाकरमङ्गलैकनिलय श्रेयस्करं प्रार्थये ॥ २५ ॥

— श्रीरत्नाकरसूरिविरचिता।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

२०. सूक्त्यन्योक्तिविलासः

किं जन्मना च महता पितृपौरुषेण,
शक्त्या हि याति निजया पुरुषः प्रतिष्ठाम् ।
कुम्भा न कूपमपि शोषयितुं समर्थाः,
कुम्भोद्भवेन मुनिनाऽम्बुधिरेव पीतः ॥ १ ॥

पततु नभसो गच्छत्वस्तं निमज्जतु वारिधौ,
व्रजतु वरुणागारद्वारं प्रभाभिरनाहतः ।
तदपि तरणिर्दत्त्वा पादं शिरःसु महीभृतां,
दलिततिमिरव्रातः प्रातः पुनः सकृदेष्यति ॥ २ ॥

आरम्भगुर्वी क्षयिणी क्रमेण,
लघ्वी पुरा वृद्धिमती च पश्चात् ।
दिनस्य पूर्वार्धपरार्धभिन्ना,
छायेव मैत्री खलसज्जनानाम् ॥ ३ ॥

स किमु सहेत सुधांशुः स्मरहरभालानलज्वालाः ।
शिशिरैः शीकरनिवहैः सिञ्चति सुरनिम्नगा नो चेत् ॥ ४ ॥

क्व चाम्भोधौ जन्म क्व च वपुरिदं कुन्दधवलम्,
क्व चावासस्थानं कृतमहह विष्णोः करतलम् ।
क्व नीचानामास्ये परिणतिरियं चुम्बनविधा-
वितीवायं शङ्खः करुणकरुणं रोदिति मुहुः ॥ ५ ॥

चिन्तनीया हि विपदामादावेव प्रतिक्रिया ।
न कूपखननं युक्तं प्रदीप्ते वह्निना गृहे ॥ ६ ॥

गीर्भिर्गुरूणां परुषाक्षराभिस्तिरस्कृता यान्ति नरा महत्त्वम् ।
अलब्धशाणोत्कषणा नृपाणां न जातु मौलौ मणयो विशन्ति ॥ ७ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्राणाघातान्निवृत्तिः, परधनहरणे संयमः, सत्यवाक्यम्,
काले शक्त्या प्रदानं, युवतिजनकथामूकभावः परेषाम् ।
तृष्णास्रोतोविभङ्गो, गुरुषु च विनयः, सर्वभूतानुकम्पा,
सामान्यः सर्वशास्त्रेष्वनुपहतविधिः श्रेयसामेष पन्थाः ॥ ८॥

लभेत सिकतासु तैलमपि यत्नतः पीडयन्
पिबेच्च मृगतृष्णिकासु सलिलं पिपासार्दितः ।
कदाचिदपि पर्यटन् शशविषाणमासादये—
न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ॥ ९॥

अयि रोषमुरीकरोषि नो चेत्किमपि त्वां प्रति वारिधे वदामः ।
जलदेन तवार्थिना विमुक्तान्यपि तोयानि महान्न हा जहासि ॥१०॥

यदा किंचिज्ज्ञोऽहं द्विप इव मदान्धः समभवम्,
तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मनः ।
यदा किञ्चित्किञ्चिद् बुधजनसकाशादवगतं,
तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगतः ॥ ११॥

आपेदिरेऽम्बरपथं परितः पतङ्गा,
भृङ्गा रसालकुसुमानि समाश्रयन्ते ।
संकोचमञ्चति सरस्त्वयि दीनदीनो
मीनो नु हन्त कतमां गतिमभ्युपैतु ॥ १२॥

वसन्त्यरण्येषु, चरन्ति दूर्वाः, पिबन्ति तोयान्यपरिग्रहाणि ।
तथापि वध्या हरिणा नराणां को लोकमाराधयितुं समर्थः ॥१३॥

दौर्मन्त्र्यान्नृपतिर्विनश्यति, यतिः सङ्गात्सुतो लालनाद्—
विप्रोऽनध्ययनात्कुलं कुतनयाच्छीलं खलोपासनात् ।
ह्रीर्मद्यादनवेक्षणादपि कृषिः, स्नेहः प्रवासाश्रया—
न्मैत्री चाप्रणयात्समृद्धिरनयात्त्यागात्प्रमादाद्धनम् ॥ १४॥

नितरां नीचोऽस्मीति त्वं खेदं कूप मा कदापि कृथाः ।
अत्यन्तसरसहृदयो यतः परेषां गुणग्रहीतासि ॥ १५॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अपूर्वैः कोऽपि कोशोऽयं विद्यते तव भारति ।
व्ययतो वृद्धिमायाति क्षयमायाति संचयात् ॥ १६ ॥

वरमस्तिधारा तरुतलवासो वरमिह भिक्षा वरमुपवासः ।
वरमपि घोरे नरके पतनं न च धनगर्वितबान्धवशरणम् ॥१७॥

यः पठति लिखति पश्यति परिपृच्छति पण्डितानुपाश्रयति ।
तस्य दिवाकरकिरणैर्नलिनीदलमिव विकास्यते बुद्धिः ॥१८॥

अयाचितः सुखं दत्ते याचितश्च न यच्छति ।
सर्वस्वं चापि हरति विधिरुच्छृङ्खलो नृणाम् ॥ १९ ॥

सन्तः स्वतः प्रकाशन्ते गुणा न परतो नृणाम् ।
आमोदो न हि कस्तूर्याः शपथेन विभाव्यते ॥ २० ॥

उपकारमेव तनुते विपद्गतः सद्गुणो नितराम् ।
मूर्च्छां गतो मृतो वा निदर्शनं पारदोऽत्र रसः ॥ २१ ॥

निर्गुणः शोभते नैव विपुलाडम्बरोऽपि ना ।
आपातरम्यपुष्पश्रीशोभितः शाल्मलिर्यथा ॥ २२ ॥

यः स्वभावो हि यस्यास्ति स नित्यं दुरतिक्रमः ।
श्वा यदि क्रियते राजा तत्किं नाश्नात्युपानहम् ॥ २३ ॥

अनुगन्तुं सतां वर्त्म कृत्स्नं यदि न शक्यते ।
स्वल्पमप्यनुगन्तव्यं मार्गस्थो नावसीदति ॥ २४ ॥

सहसा विदधीत न क्रियामविवेकः परमापदां पदम् ।
वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः ॥२५॥

— प्रकीर्णग्रन्थेभ्यः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आम्र
भरतनिधि

Dr. Urmila Sharma Collection, Varanasi